M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. / Ser. 14014

Title: Nyaya Siddhant Manjiri Prakash

1404

In Complete

: Nyaya Siddhant Manjari : Title Prakash

: : Bhaskar : Author

: : Tuljaram Pandya : Editor scribe

S(C : : Samvat 1852 : Year, Vols.

: : : Publisher

1404 : : 79 to 101 : Remarks

किं तु लाघवादन्योन्याभावबोधकत्वं। तथा च नञोऽन्योन्याभावत्वाक्रान्तेऽपि शक्तत्वमेव॥ प्राञ्चस्तु संसर्गाभावत्वमत्यन्ताभावत्वं वा नञः शक्यता
वच्छेदकं॥ न त्वन्योन्याभावत्वं॥ नानार्थतापत्त्या गौरवात्॥ इत्थं च कुम्भे तत्त्वे घटो नास्तीत्यादौ प्रसज्यप्रतिषेधस्थले तादात्म्यसंसर्गाभावबोधो
दया[illegible]स्तु लक्षणाप्रयोगो नञ्पदस्य॥ अघटः पट इत्यादौ पर्युदासे च नञ्पदाल्लक्षणयान्योन्याभावबोधात्तत्प्रयोगो गौणः॥ अत एव पर्यु
दासापेक्षया प्रसज्यप्रतिषेधो बलवान्॥ लक्षणाया असत्त्वात्॥ नन्वेवं प्रसज्यप्रतिषेधस्य बलवत्त्वे यजतिषु येयजामहं करोति ना
नुयाजेष्विति अत्र पर्युदासमाश्रित्य अनुयाजभिन्नेषु यजतिषु येयजामह इति मंत्रप्रयुक्तेस्त्वन्वयबोधात्कस्मात्॥ न च बलवत्ता १८
त्॥ प्रसज्यप्रतिषेध एवाश्रयणीय इति वाच्यं॥ तथा सति यजतिषु येयजामहमिति मंत्रप्रयुक्तेरनुयाजेषु तन्मंत्रेण प्रयुक्तेरन्वयबोधः
स्यात्तथा च वाक्यभेदापत्तिर्दान्तश्चेति चेन्न॥ एकवाक्यत्वे संभवति वाक्यभेदस्यानुचितत्वेन लाक्षणिकस्यापि पर्युदासस्य तन्त्राश्रयण॥
त्॥ पर्युदासप्रसज्यप्रतिषेधयोः स्वरूपं चोक्तमभियुक्तैः॥ प्रसज्यप्रतिषेधस्तु क्रियया सह यत्र नञ्॥ पर्युदासः स विज्ञेयो यत्रोत्तर
पदेन नञ् इति॥ स द्विधा होति॥ तथा च ब्राह्मणोऽन्यस्तत्त्वादौ ब्राह्मणभिन्नो ब्राह्मणसदृशः क्षत्रियादिरेव प्रतीयते लक्षणया॥ न घटपदेऽपि
ति॥ अघटः पट इत्यत्र घटसंबंधिभिन्नघटपदलक्षणायुक्तेत्यर्थः॥ नामार्थयोरिति॥ अत्र भेदेनेत्यस्याभेदातिरिक्तसंबंधेनेत्यर्थः॥ तेन
प्रतियोगितादीनां सर्वेषां संग्रहः॥ तथा च घटः पट इत्यादौ लक्षणया घटपदार्थस्य घटसंबंधिनो नञर्थस्यान्योन्याभावस्य चाभेदेनैवा
न्वय इति भावः॥ कथं तर्हीति। यदि नामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वं तर्हि न घटः पट इत्यत्र प्रतियोगितासंबंधेनान्वयः कथं घटतदन्योन्या
भावयोरन्वय इत्यर्थः। घटपदस्येत्यादि तथा च नापि घटपदार्थनञर्थयोरभेदेनैवान्वय इति भावः॥ ननु न घटः पट इत्यत्र घटपदस्य घ
टप्रतियोगिके लक्षणायां स्वीकृतायां घटपदोत्तरप्रथमाया निरर्थकत्वमेव स्यादत आह प्रथमायां वेति॥ षष्ठ्यर्थः प्रतियोगित्वे॥ तथा च वि
भक्त्यर्थद्वारे तयोरन्वयः॥ नामार्थयोः साक्षाद्भेदेनान्वयबोधस्याव्युत्पन्नत्वात्॥ साक्षाद्विभक्त्यर्थमद्वारीकृत्येत्यर्थ इति भावः॥ कर्मता
प्रत्यय इति॥ मातुः स्मरतीत्यादौ षष्ठीतः कर्मताप्रत्यय इत्यर्थः॥ बहुवचनमिति॥ एकत्र बहुवचनस्य बाधात्॥ लक्षणयैकत्वमात्रप्रतिपादकं

या॰

न्या॰म॰ बहुवचने कथंस्यादित्यर्थः॥ आनुशासनिकीति॥ मातुस्मरतीत्यादौ षष्ठ्याः कर्मत्वे दाराः इत्यत्र बहुवचनस्यैकत्वे च लक्षणाऽवधि
गर्थ दयेषां कर्मणि॥ दारा इत्यादौ नित्यं बहुवचनान्तत्वं इत्याद्यनुशासनेन प्रतिपादितेष्टत्व इत्यर्थः॥ तुल्यमिति॥ नेघट इत्यादावपि
प्रथमापाष्ठ्यर्थे लक्षणा अनुशासनिकैवेति तुल्यमित्यर्थः॥ अनुशासनं दर्शयितुं वैयाकरणसंमतिमाह तदिष्टमाकुरिति॥ निय
व्य ४ तप्रयोगा हीति॥ अत्राव्ययाः सहार्थः। तथा च निष्पन्नत्वादागतो गुरुरित्यादौ साहादियोगात्तृतीयैव तद्वत्तन घट इत्यत्र नञ् प्रयो
गात् घटपदोत्तरं प्रथमैव न षष्ठीति भावः। तथापि॥ अघटपट इत्यादौ प्राग्युक्तरीत्या घटस्य नञर्थयोरन्वयोपपन्नावपि। आश्रया
श्रयीभावेनेति। घटसंबंधिन्यन्योन्याभाववान् पट इत्यन्वयः। कथमित्यर्थः। नञ्पदमभाववत्वलक्षकमित्यभिप्रायेण चोद्यं परिहरति
मैवमिति॥ ससंबंधिकेति॥ यस्मिन् दृष्टे अकृते वाऽपरसंबंधिस्मरणे स ससंबंधिकः पदार्थः॥ यथाह हस्ति हस्ती पकादिः। दृष्टान्तमा
ह यथेति॥ जनकपुंस्त्वं पितृपदार्थस्तदेकदेशो जनकत्वे नैवत्यान्वयः। नैव निरूपितं जनकत्वविशिष्टः पुमानिति बोधादिति॥ समु
दाय एवेति॥ नञ्पदलक्ष्येऽभाववत्येव स्वाभावानुयोगित्वसंबंधेन घटापदार्थान्वय इति नैकदेशान्वय इति भावः। आकुरित्यस्त
रसो ज्ञापनेन द्वाजेनुअभावस्य संसर्गकोटिप्रवेशोपकार्ययामानेन स्यात् किन्तु घटवान्न पट इत्येवान्वयधीः स्यादिति॥ अन्यथा अघ
टः पट इत्यादौ नञ्भावमात्रपरत्वे॥ समानविभक्तिकत्वेति॥ अघटमित्यादावभेदान्वयबोधासंभवाद् अभेदान्वयनियामकस ७९
क मानविभक्तिकत्वानुपपत्तेरित्यर्थः॥ समानविभक्तित्वं च विभिन्नविभक्त्यव्यवहितत्वं। अन्यथा नीलोत्पलमित्यादावभेदान्वयबोधोन
स्यात्॥ तत्र समानविभक्तिकत्वाभावादितिभावः॥ अन्यथैव ब्युत्पत्तिरिति। नामार्थयोरभेदेनैवान्वय इति व्युत्पत्तिविलक्षणैव व्यु
त्पत्तिः निपातरूपनामार्थस्यापरनामार्थेन सह भेदेनैवान्वय इत्येवं रूपेत्यर्थः॥ न घटादिपद इति॥ अघटः पट इत्यादौ घटादिपदेष
ट संबंधिनी न लक्षणेत्यर्थः। अत एव निपातरूपनामार्थस्यापरनामार्थेन सह भेदेनान्वयसद्भावादेव॥ भेदेनान्वयः॥ चंद्रसा

दृश्यपद्मनुखमित्येवं रूपः॥ निष्फलं कृशत्ति। लक्षणां विनैवभवतीत्यर्थः। ननु निपातस्थलेऽन्यैवम् व्युत्पत्तिरित्यत्र चंद्र इव वार्य युगभेदेनान्व
यः॥ बोधएव मानं स्यादतआह चंद्र इवेति॥ तत्सदृशालक्षकमिति। चंद्रसदृशालक्षकमित्यर्थः॥ तथा च चंद्रसदृशाभिन्नं मुखमि
त्यभेदान्वयबोधसंभवान्नतु व्युत्पत्त्यन्तरकल्पनमिति भावः॥ अत एवेति॥ अतश्च चंद्र इवेत्यादौ चंद्रपदे चंद्रसदृशलक्षकमत एव स
र्थः॥ अघट इत्यत्रापि घटपदोत्तरं प्रथमा यानिरर्थकतापत्तिरिमयादाहास्त्वेवेति॥ अनुशासनेति॥ नियतप्रयोगाहीत्यनुशास
नानुग्रहादित्यर्थः॥ तथा सति॥ घटो नास्तीति वाक्यस्य घटाभावोऽस्तीत्यर्थकत्वे सतीति॥ अभावस्यैकत्वादिति। तथा च यं यंभा
वनान्वेतितेनसंख्यापीति नियमादस्तीत्यरूपभावनान्वयिनि घटद्वयाभावे स्तीत्याख्यातोपात्तापत्यैकत्वान्वयसंभवात् घटो ना
स्तीति प्रयोगापत्तिः। न हि घटद्वयाभावो द्वयीमानाभावादितिभावः॥ नस्त इत्यादिति। घटद्वयाभावस्यैकत्वान्नस्त इति द्विवचनानु
पपत्तेरिति भावः। नञ् घटित वाक्ये यं भावनान्वेति तत्प्रतियोगिनं संख्यापीति नियमस्तु घटौ न स्त इति प्रयोगमुप
पादयति भावनान्वयभावेति॥ घटौ न स्त इत्यादि प्रयोगे द्विवचनाद्युपपादकमतान्तरमाह परे त्विति॥ अस्पृश इति प्रतियोगित्वेने
नान्वयः। इह घटो नास्ति घटौ न स्त इत्यादिप्रयोगे॥ प्रतीयत इति। अत इत्यनेनान्वयि॥ द्विवचनेति। यं यं भावनान्वेति तं तं संख्या
पीति नियमो भावनानिषेधानिरिक्तस्थल एव अन्यथा च पचति चैत्र इत्यादौ व्यभिचारात्॥ तथा च घटौ न स्त इत्यादौ स्त इति द्विव
चनोपपत्तिः स्यात् अन्वयो जायते॥ तदुपपादकं च द्विकयोर्द्विवचनैकवचने बहुषु बहुवचनमित्यनुशासनमेवास्तीति नहि
वचनाद्यनुपपत्तिरिति भावः॥ अत्र भंक्तेनत्विति॥ एवं तत्तदधिकरणास्तीत्वरूपाख्यातार्थ प्रतियोगिनि सर्वत्र निषेध्यहे॥
जातित्वं तिलाभावस्येति॥ सामानाधिकरण्यसंबंधेन जातिवत्तित्वस्यैव सत्तायोसत्वादितिभावः॥ विशेषपदार्थनिमध्येत
न्ययोगान्नायोग्यत्वमस्तीत्यत आह वृत्तिपदे वेति॥ तुल्यमिति॥ सत्तायासाक्षात्संबंधावच्छिन्नजातिवृत्तिमद्दरवत्साक्षात्संबं
जा स्ये

न्या सि॰ मं धावृच्छिन्नजातिवृत्ति तस्य जातित्वादौ प्रसिद्धस्य सत्तायां निषेधसंभवान्नु व्याप्त मित्यर्थः। शंकते तथापीति॥ भूतले घटो नास्तीत्यादावाख्या
र्थस्यैव निषेधपरत्वे पात्यर्थः। कथमिति॥ नामार्थयोरभेदेनान्वयः प्रामाण्यादिति भावः। नञ्पदस्य संसर्गाभावाभावयोरपि शक्तत्वात्
८० कुत्रचिदन्योन्याभावः कुत्रचिदत्यन्ताभावः प्रतीयते किंमत्र नियामकमित्यत आह तिपति स्यादेतदिति॥ नपश्चेत्यादि॥ अत्रपाकानुकूलकृत्ये
त्यन्ताभावयोः अश्चैत्रःचैत्रस्य तत्त्वावच्छिन्नाभाववदधूनमित्यत्रेतान्नान्वयबोधे विसंसर्गप्रभावादित्यर्थः। अलघुपचतीत्यादि॥ अत्र लघुभिन्नपाककर्तृ नीय५
त्वान्वयबोधे पाके लघुभेदाभावान्नेपि लघुपचत्योः समानविभक्तिकत्वाभावादित्यर्थः। क्रियाविशेषणानां कर्मत्वं नपुंसकलिंगत्वेति पाणिवचना
दलघ्वित्यस्य द्वितीयांतत्वात्॥ पचतीत्यस्य चेति उक्तादिति भावः। अन्यत्रेति॥ नञ्र्विनिर्मुक्तेपि यत्राभेदान्वयबोधेनाकांक्षा किंतु भेदान्वय
स्मा बोधे तत्रेत्यर्थः। ननु यत्र गतो दैवमर्कं इति वाक्यश्रवणानंतरं दूरं मागाः पश्यान्वयप्रसारयेत्तां संध्योपास्या नामित्यादिबहुविधार्थप्रत्ययो बहु
नां पायवणिकविप्रादीनां जायते तत्र न शक्तिमूलं अक्वादिशब्दस्य तत्तदर्थवाचकत्वाभावात्। नापि लक्षणा॥ शक्यनियतसंबंधाभावात्॥
नाप्यनुमानं॥ नियतलिंगाभावात्॥ नापि संस्कारः तत्तदर्थगोचरस्यानुभवाभावात्तः शब्दस्यैवान्वयव्यतिरेकाभ्यां व्यंजनाख्या वृत्तिराश्र
यणीया तत स्तदर्थप्रत्ययः। न च वाक्यभेदः शक्यलक्ष्यार्थयोर्भेदादेव तदर्थस्योपगमादित्यालंकारिकमतं निराकुर्वन्नाह व्यंजनाचेति॥ तदर्थ ८०
मिद्धेः। कंप्यार्थप्रतीतेः। सामान्यतः शक्यसंबंधस्य तत्र दर्शकत्वादिति भावः। लक्षणा नियामकान्वयानुपपत्तिज्ञानस्य व्यंजनायामभावा
प्रि५ त्व लक्षणया तदर्थसिद्धिरित्यभिप्रायेणशंकते नन्विति॥ इदं लक्षणायाः व्यंजनायाश्च तात्पर्यं स्वापीक्षातु मितो गतास्ति न पुनरुक्तस्याधम
स्योतिकमित्यादौ तस्योतिकं रंतुं गतासीत्येतदर्थव्यंजकाधमपदस्वरसान्तरस्याप्यन्वयस्य बाधितत्वादनुपपत्तिरस्त्येव॥ अत एवतस्त्वे वा
पिस्नातुं न गतासि किंतु तस्याधमस्यांतिकं गतासीति वाक्यार्थबोधे विधौ निषेधलक्षणया न गतासीति निषेधे तु विधिर्लक्षणया जोय
ते इत्यतउक्तं सर्वत्रेति॥ गच्छगच्छसीत्यादाविति॥ गच्छगच्छसि चेत्कांत पंथानः संतु ते शिवाः॥ ममापि जन्म तत्रैव भूयाद्यत्र गतो
भवानित्यादावन्वयानुपपत्तेरभावादित्यर्थः। तथा चात्र लक्षणायाअसत्त्वाद्व्यंजनैव वक्तेमागा इत्यर्थबोधोवाच्य इति भावः॥ त

६

ज्ञानकत्वं। लक्षणाजनकत्वं॥ तात्पर्यव्याप्त्यंतरतोपीति॥ लक्ष्यार्थेतात्पर्यस्य व्याप्यांतरस्यान्वयानुपपत्तिभिन्नं प्रकरणादितत्तोपीत्यर्थः॥ तद्वेह
तु॥ लक्ष्यार्थेतात्पर्यग्रहान्॥ अयेत्यादि॥ तत्र॥ लक्षणाबीजत्वे। व्यभिचारादिति यष्टिधारकलाक्षणिकयष्टिपदमुख्यार्थितयष्टिषु प्रवेशाना
न्वयानुपपत्तेरभावात्यत्र लक्षणा तत्रान्वयानुपपत्तिरिति नियमे व्यभिचारादित्यर्थः। तात्पर्येति॥ तात्पर्यविषयीभूतोयष्टिधरप्रवेशान्वय
स्तदनुपपत्तिरित्यर्थः। अत्रापि॥ यष्टीः प्रवेशयेत्यादावपि। संभवतीति। तंमागा इत्यर्थे तात्पर्यानुपपत्तिर्गच्छ गच्छसीत्यादावप्यस्तीत्यर्थः। पुनर्व्यंजना
या लक्षणा तो भेदकमाह इयत्वा॥ प्रतिपत्स्यादेतदिति॥ गंगायां घोष इत्यादाविति॥ घोषे शैत्यपावनत्वादिप्रतीतिर्गंगापदे लक्षणायाः प्र
योजनं॥ अन्यथाप्यत्र शब्दप्रयोगे किमित्यत्रावृत्तप्रयोक्तृकमिति न्यायात्॥ गंगातीरे घोष इत्येव प्रयुज्येतेति भावः। तत्प्रतीतिः शैत्यपा
वनत्वादिप्रतीतिः। लक्षणयास्त्वेति॥ निरूढलक्षणान्यलक्षणयाश्चेत्यर्थः। निरूढलक्षणायाः प्रयोजनवत्त्वानभ्युपगमादिति। प्रयोजन
वत्त्वनियमादिति या निरूढलक्षणान्यलक्षणासा प्रयोजनवतीति नियमादित्यर्थः। तथा च व्यापकनिवृत्तौ व्याप्यनिवृत्तेरावश्यकत्वान्न
क्ष्ये ८ व्यंजनायाल्लक्षणत्वमिति भावः। ननुलक्ष्येति॥ यातादृशलक्षणासा लक्ष्येप्रतीत्यतिरिक्तप्रयोजनवतीति नियमेनेत्यर्थः। गौरवादिति
व्यापकतावच्छेदके गौरवादित्यर्थः। नन्विदं प्रामाणिकं गौरवं न दोष इत्यत आह प्रयोजकत्वाच्चेति॥ पुनर्व्यंजनां साधयितुं प्रस्तौति ष्टते
स्यादेतदिति॥ नानार्थस्थले॥ सैंधवमानयेत्यादाविलर्थः। अर्थविशेषप्रत्यये॥ अश्वलवणादिप्रत्यये॥ प्रकरणादिकमिति। प्रकरण
भोजनगमनाद्युपक्रमः आदिना संयोगादिपरिग्रहः। तेन सशंखचक्रो हरिरित्यादौ शंखचक्रसंयोगेन हरिशब्दाद्विष्णोरेवप्रतीतिर्ननु
शक्यादेरिति॥ तथा च प्रकरणादेर्नियामकत्वे च॥ अभिधाशक्तिः सहकारित्वाभावात्। प्रकरणाद्यभावात्। अयोगादिति॥ शक्तिविषयैर्हेतु
र्थे लक्षणायाअयोगादित्यर्थः॥ तात्पर्यग्राहकत्वेनेति॥ अर्थविशेषे तात्पर्यग्राहकत्वेनेत्यर्थः॥ इयं तु॥ व्यंजना तु व्यंजनायास्तन्मते पदस्तदेकदे
शाद्याश्रितत्वादाहपदैकदेशेत्यादि॥ असिद्धेरिति॥ व्यंजनायाः पदैकदेशाद्याश्रितत्वासिद्धेरिति॥ अर्थः॥ असिद्धिमेव विवृणोति पदैकदेशाद्योही
ति॥ चार्थरिचितेति॥ स्वतात्पर्यविषयीभूतार्थमादाय निर्मितकाव्यादाविल्यर्थः। यथा सुरयोनामरा जाम्भसम स्तोद्दिति मंडलेस्सादौ कवितात्

न्या·मं·

८०

र्याविषयस्यापि सुरथो नाम राजा क्षितिमंडले ऽभवत् धासमो ऽभूदित्यर्थस्य चमत्कारात्मतीतेरित्यर्थः। नलुके राज्ञा कुकादिकमिति। गंगायां
बंधात्तीरस्थ घोषे ऽकंगदेरपि संभवादिति भावः। वासनाविशेषेति। उत्पन्ने स्फारविशेषेत्यर्थः। स एव। वासनाविशेषपरिपाक एव॥ ननु
यस्माच्छब्दाद्यस्यार्थस्य निश्चयस्तत्रार्थे तस्य शब्दस्य वृत्तिः कल्प्यते यथा घटादौ घटादिशब्दस्य॥ न च व्यंजकशब्दाद्व्यंग्यस्य निश्चयः॥
अतो न व्यंजनावृत्त्यंतरमित्यस्मि आप वानाह वस्तुत इति॥ प्रजयती तारो ऽजयः प्रकर्षादिः प्रादिनोपसर्गेणापि व्यंजनया प्रतिपाद्यत
इति व्यंजनावृत्तेः स्वीकाराद्येन पुनः प्रत्यवतिष्ठते स्यादेतदिति॥ एतएव वृत्तिरिति॥ शक्तिलक्षणे एव वृत्ती॥ अशक्तत्वादिति॥ शक्ति
विरहादित्यर्थः॥ तथा च शक्यसंबंधरूपलक्षणाया अपि प्रकर्षादेरेव संभवतीति भावः। तात्पर्यं ग्राहकः। जिधातो प्रह्लस्तुजय
ता स्यर्थ ग्राहकः। ननु प्रादेस्तात्पर्यग्राहकत्वे धातकत्वं नस्यादत आह तत्वमेव चेति॥ तात्पर्यग्राहकत्वमेव चेत्यर्थः। शक्यादन्ये
नेति। शक्यतावच्छेदकादन्येनेत्यर्थः। अत एव घटपदान्नीलघटत्वादिना रूपेण बोधो नहि सर्वथैवेति। अन्यलभ्यत्वादिति
लक्षणालभ्यत्वादित्यर्थः। निपातत्वमादेः शक्तत्वे पादिनीयानां प्रातिपदिकसंज्ञा। चिघाद्यर्थे निपातस्यानर्थकस्येति
सूत्रं व्यर्थमेव स्यात्। अर्थवदधातुरप्रत्ययः प्रातिपदिकमितिसूत्रेणैव तत्सिद्धेः ~~...~~ सादृश्यादित्युक्तानामि
वादिति पातानामर्थवदधातुरित्यनेनैव प्रातिपदिकसंज्ञाविधानादुक्तमनर्थकस्येति निपातविशेषणमित्याहुः॥ व ८२
स्तुतस्तु जिधातोरेव जितेन जयसामान्ये शक्तिः प्रोत्तरजितत्वेन च प्रह्लस्तुजये॥ धातुनामनेकार्थत्वात्॥ अत एव प्रतिष्ठते इ
त्यत्र प्रह्लस्थितेर्न बाधः॥ प्रोत्तरस्थितिरत्ती तेन तस्थौ तोर्गमन एव शक्तेः। तिष्ठतितेन प्रागमन एव शक्तेः। तथा च मादिश
क्तितावच्छेदक एव तत्तुद्योतकत्वमिति न तु यद्यपसर्गाणां द्योतकत्वं धातुनामेव चलेत्यस्यात्तदर्थप्रतिपादकत्वेत्तदाख्य
तिसेत्सत्र व्यत्यासबोधो ऽवस्थात्॥ तत्रास्ते लोपेन धातोरेवासत्यादित्याह व्यंजनेति॥ व्यंजनावाद्येव तु नः प्रत्य

त घ

तिष्ठते स्यादिति॥ आख्यातस्येति। अत्र शक्यतावच्छेदक आख्यातत्वं तिबादौ ऽन्यतमत्वं सकेत विशेषणमाख्यातपदवत्त्वेति॥ फलएवशा
क्यइति॥ फलत्वमेव शक्यतावच्छेदकमित्यर्थः॥ तेन व्यापारशक्तिवादिनापि फलस्य व्यापारे तेनाख्यातवाच्यत्वाभ्युपगमान्न सिद्ध
साधनमिति भावः। विवरणादिति॥ पचतीत्यस्य पाकं करोतीति विवरणे तत्र निविष्टेन यत्नतापृष्टित्रयाख्यातकत्वेनेनित्येन तत्धातु
ना विवरणादित्यर्थः। यत्स्वस्वसमानार्थकत्वं यायस्य पदस्य बोधकं तत्तदेतस्य पदस्य विवरणं तथा च प्रयोगः। यत्नत्वमाख्यातशक्य
तावच्छेदकं शक्यतावच्छेदकसंबंधेनाख्यातविवरणांत्वात्। दित्यबोधकं पदो बोध्यः। यत्तादृशसंबंधेन यत्पदविवरणवत्तत्तत्पदशा
क्यतावच्छेदकमिति सामान्यव्याप्तिः यथा घटत्वं शक्यतावच्छेदकत्वसंबंधेन घटपदविवरणकलशादिपदवत् यतितत्वघटपदशक्य
तावच्छेदकमिति दृष्टांतः। अत्र प्रयोजकत्वं शंकानिरस्यतिव्यवहारादिवदिति॥ इदमुपलक्षणं ऽके विषयकृत्यत्वानितिमन्ने
पचतिरिसुत्तरवाक्यादपि आख्यातस्य यत्नत्वावच्छिन्ने शक्यतात्वं निर्णयते। प्रश्नोत्तरयोः समानविषयकत्वस्य सर्ववादिसिद्धत्वादिति।
एतेन पचतीत्यस्य पाकं करोतीति विवरणात्तस्य न यत्नार्थकत्वं॥ तत्र दृशविवरणस्य सर्वदा मिलितासंभावात्॥ निर्भासकादिमिस्ता
प दृशविवरणान्तस्यं गमादिति परास्तं। तथाचेति॥ आख्यातस्य यत्नार्थकत्वे चेत्यर्थः॥ नन्वत्र प्रयोगे आख्यातस्य व्यापारे लक्षणो
स्त्वत आह नापीति॥ अन्यथा॥ विभक्त्या वपिलक्षणानंगीकारे। व्यत्ययेति॥ यावत्सुराणि पातयोग्ये विष्णुहत्येलुट्॥ कर्तृकर्मणोः
६५ कृतीत्यादि अनुशासनवैयर्थ्यादित्यर्थः॥ एतदनुशासनं विनापि षष्ठ्यर्थबहुवर्तीतिपुराणात्। स्यादेतहोम विष्णुद्वेष बोधस्य व्याप्त
स्य हितिमारितस्य श्रवणमिति दोषस्तीतः॥ कर्तृत्वकर्मत्वस्य च लक्षणये वसंभवात्॥ तस्मात्तदनुशासनं यावत्सुरायो गलरोप
विष्यदर्थे। कृद्योगे च षष्ठ्याः कर्तृत्वकर्मत्वयोः शक्तिप्रतिपादकमेवेतिभावः॥ अंतरंगेत्यादि छतिः स्यादौ गमनानुकूलव्यापार
वानिति बोधस्यस्याप्यनुपपत्तिनः। तृप्तेतितरं। आख्याते व्यापारे फलस्यापकं तदुद्वेतरं॥ चिपक्ता कृपिलक्षणाभ्युपगमे नांतो व्यापा ख्या२
रोपस्थितिसंभवात्तदरत्वांतरकल्पनमित्यपि न्यायेन समाधत्ते अत्ययेति॥ एतदनुशासनबलादेकस्याविभक्तेरपरविभ

सं२

न्या·मे· न्नर्थे न लक्षणेति नियमो लभ्यते। ननु विभक्त्यर्थातिरिक्तेऽपि न लक्षणेति नियमोऽपीत्यर्थः। इह चु।। रथो गच्छतीत्यादिप्रयोगेऽपि॥ बि२
किंतु व्यापार इति। इदं प्राञ्चां मतं॥ न क्षमतेवा आश्रयत्वेन लक्षणा॥ रथो गमनाश्रय इति बोधादिति॥ वृस्कृत एककस्यापि भिक्तेर
८२ परा विभक्त्यर्थे न लक्षणेति नियमोऽपि नास्तीत्याह रथ इत्यत्र चेति॥ कर्तृकर्मणोः कृति॥ नुशासनं मित्युक्त कर्मत्वादौ। द्वित्तिपाद्यर्थे षष्ठ्या
श्या ४ लक्षणा रथ इत्यत्र इत्यर्थः॥ अत्र चकारः किमर्थं उदाहरतीत्यर्थेति। भारतस्य श्रवणं जगतः कर्तेत्यादौ कर्मत्वं व्यासस्य कृतिरित्यादौ च
कर्तृत्वेन षष्ठ्या लक्षणेत्यर्थः। नन्वेतत्सूत्रं नवाल्लध्योगे षष्ठ्याः। कर्तृत्वकर्मत्वयोः संबंधत्वेनाक्तिरेवास्तीति वाच्यं॥ नानार्थता
पातादिति॥ सम्बन्धावयवेति॥ षष्ठी शेषे इत्यनुशासनेन षष्ठ्याः संबंधसामान्ये शक्तिबोधनादिति भावः। तथा विनाः लक्षणाया
विना। असंभवादिति। कर्मत्वादेः षष्ठ्यर्थत्वे नवच्छेदकत्वेन तत्प्रकारकबोधस्य वक्तव्यत्वात्। संबंधस्य लक्षणयैव बुध्यता
दिति भावः। तत्प्रकारकः। कर्मत्वत्वादिप्रकारकः॥ किंतु संबंधत्वप्रकारक इति। तथा च जगतः कर्तेता भारतस्य श्रवणं व्यासस्य
कृतिरित्यादौ जगत्संबंधिकर्तृत्ववान् भारतसंबंधिश्रवणं व्याससंबंधिनी कृतिरित्येव बोध इति भावः। अनुशासनवैयर्थ्या
दिति। जगतः कर्तेत्यादौ जगत्कर्मककर्तृत्ववानिति कर्मत्वप्रकारकबोधोदये दिने किंतु संबंधत्वप्रकारक एव तदा षष्ठीत्यो
षे इत्यनेनैव कृद्योगेऽपि शेषषष्ठ्याः संभवेन कर्तृकर्मणोः कृतीति सूत्रवैयर्थ्यप्रसंगादित्यर्थः॥ द्वितीया इति॥ जगतः कर्तेत्या ८२
दौ जगत्कर्मककर्तृत्ववानिति कर्मत्वबोधजनकषष्ठ्याः साधुत्वं तु द्वितीयेत्येतदर्थज्ञापकं कर्तृकर्मणोरित्यनुशासनमतो
न तस्यानर्थक्यमित्यर्थः। निष्ठादिवर्जनेति॥ न लोकाव्ययनिष्ठाखलर्थतृनामिति सूत्रेण वृत्तेर्हेतुतानिर्देशः। इत्यनेन कृतो वृत्त
रित्यादौ निष्ठादिकृत्प्रत्यययोगे षष्ठीनिषेधप्रसंगतेरित्यर्थः। सामान्यतः कृद्योगे षष्ठीप्राप्त्यभावेन निषेधानुपपत्तेः। कर्तृक
र्मणोः कृतीति सूत्रस्य द्वितीयाया असाधुत्वज्ञापकत्वेन षष्ठीविधायकत्वाभावादिति भावः। न चायं निषेधः शेषषष्ठ्या एव
वेति वाच्यं। संबंधप्रकारकषष्ठ्याः प्रतिषेध इति वार्त्तिकविरोधात्। ननु न लोकेत्यनुशासने निष्ठादियोगे द्वितीयात्मीय

योः साधुत्वज्ञापकमेव न तु षष्ठीनिषेधकमतो नानर्थकमित्याशंक्य तेन तद्दित्यादिना विकल्पविधानेति। कृत्यानां कर्तरि वेति। सूत्रेणन्यया
मम कार्यो हरिरित्यादौ कृत्ययोगे षष्ठीविकल्पविधानवैयर्थ्यापत्तेरित्यर्थः। ननु कृत्यायोगे तृतीयायाः अपि प्राप्त्यर्थं कृत्यानां क
र्तरि वेति विकल्पविधानमत आह। निषेधेनेवेति। कर्तृकर्मणोः कृतीति सूत्रं यदि कृद्योगे षष्ठीविधायकं स्यात्तदा सर्वेऽपि हि वा कं३
सावधारणमितिन्यायात् तृतीयायाः कृत्ययोगे निषेधः स्यात् तत्र द्वन्द्वं किंतु नत्वत्र कृद्योगे कर्तरि प्राप्तमावाः कर्मणि द्वितीयाया
श्च साधुत्वज्ञापकं॥ तथा च कृत्ययोगे निषेधेनैव तृतीयाप्राप्तिरिति भावः। पाक्षिकपुष्टार्थं तदिति॥ कृद्योगे तृतीयाया प्राप्तिलनि
षेधादेवास्तु परं तु पक्षे षष्ठीप्राप्त्यर्थं कृत्यानां कर्तरि वेति सूत्रमित्यर्थः। शेषपदनादेव सिद्धेरिति। मयाममपवास्से व्यो हरिरित्यादौ संबंध
सप्रकारकबोधजनिका षष्ठी शेषवचनादेव सिद्धेति पाक्षिकषष्ठ्यर्थमपि तत्सूत्रस्यापेक्षयाभावात्॥ इति भावः। निष्ठादियोग इति। कर्तृणां कर्तृ
रि वेति अनुशासनेन निष्ठादियोगे शेषषष्ठ्याः असाधुत्वज्ञापकत्वं कृत्ययोगेऽनु तस्याः साधुत्वज्ञापकमित्यर्थः। तद्योगेऽपि निष्ठादियोगेऽपि॥ तादृशाः॥
शेषषष्ठ्याः। बहुपुरुषीना दिति। स तोमगं मातुः स्मरणामि साः इत्यत्र ननारी त्यर्थः। द्रुपण्यतरमाह किंचेति विषयतापा मितिः॥ घटं जानाति
त्यादौ विषयत्वस्य वृत्तितीयार्थत्वादिति भावः। आयुष्येतेति निरूपार्थमनुपपन्नः॥ तत्रापि॥ घटं जानातीत्यादौ द्वितीयायाः विषयित्वेऽपि घटस्य अंतरे॥ य०
तृतीयायाः वृत्तीरित्यर्थः। कृत्यवत्स्वेव॥ लक्षणयैवा। मीमांसकास्त्विति। भट्टमीमांसकास्त्वित्यर्थः। आख्याकरणेतिसंख्यातास्याख्यातव्या
च्यत्वादिति भावः। अनुकूलव्यापारमात्रमिति॥ क्रियाजनकव्यापारमात्रमित्यर्थः। यत्नस्य माससत इति॥ न्यायमत इति शेषः। मीमांसकम
ते पाकानुकूलव्यापारस्येव बोधास्युपगमादिति भावः। कथं न हरीति॥ यदि पलताच्छिन्ने आख्यातशक्तिर्हीत्यर्थः। बहु जानातीत्यत्रैव
चैत्रो जानातीत्यादावप्याख्यातं व्यापारे लाक्षणिकं न तु मुख्यमत आह इच्छतीति। यागस्त्वाद्यादिलक्षणेच्छाया मनुकूलयत्नाभावाल्ला
नुपपत्तिरत आह यत्न तरस्यादिति। आदिनाद्वेष्टितस्य परिग्रहः। यत्नादेश्चानुकूलत्वस्य सर्वथा बाधितत्वे वेति भावः। कथं प्रयोग इति। तव
मते कथं प्रयोग इत्यर्थः। मम मते तु ज्ञानाद्यनुकूलत्वमनसंयोगादिरूपव्यापारसत्त्वान्न तत्प्रयोगानुपपत्तिरिति भावः। ननु शंक्षेपितलस्येवा क्वानिष्टय

न्या॰मे॰ त्वेज्ञानाद्यनुकूलतायाः प्रतीतिर्भविष्यतीत्यत आह प्रतीयतेवेति॥ तथा च विशेषदर्शनशून्यानामेवैतादृशप्रयोगस्यापि समाधातुं न शक्यत्वम्
तिभावः॥ आश्रयतालक्षकत्वादिति॥ तथा च चैत्रो जानातीत्यादौ चैत्रो ज्ञानाद्य॥ आश्रयत्वेनितिअन्वयधीः ज्ञानाश्रयत्वे समवायावच्छेदकतावत न्या२
८ रसंबंधेन बोधः॥ तेनेश्वरो जानातीति चैत्रो जानातीत्यादि द्विविधप्रयोगोपपत्तिः। इह सुप्लक्षणे। तेन घटो नश्यतीत्यादौ वाख्यातप्रतियोगिताल
क्षकमितिध्येयं॥ घटो नाशप्रतियोगी त्यन्वयबोधात्॥ ज्ञानातीत्यादौ लक्षणाविनैवान्वयोपपत्तेयमणिकारमतं दूषयति चिंतामणिकृत इति॥
धात्वर्थे ज्ञानादिः साक्षात् विभक्त्यर्थमन्वेति॥ अयोग्यत्वादिति। ज्ञानाद्यनुकूलयत्नस्य बाधितत्वादित्यर्थः। न च्छिन्नस्य मिति॥ चिंतावीजस्य
यमेव दर्शयति नामार्थेति॥ तंडुलं पचतीत्यादौ तंडुलवृत्तिपाकरूपो द्वितीयार्थ कर्मत्वरूपः साक्षात्संबंधेनान्वयस्तत्तदुक्तं साक्षादिति॥ विभक्त्यर्थमद्वारी
कृत्येत्यर्थः॥ स्तोकं पचतीत्यादौ स्तोकपाकयोः साक्षात् दभेदेनान्वयः स त्वादुक्तमभेदेनेति॥ अभेदातिरिक्तसंबंधेनेत्यर्थः। तथा च विशेषतया ना
मार्थधात्वर्थयोस्तत्प्रकारकबोधे प्रत्ययजन्योपस्थितिर्विषयतया कारणमिति भावः॥ अन्यथा॥ नामार्थधात्वर्थयोः साक्षाद्भेदेनान्वयबो
धस्य व्युत्पन्नत्वे। कर्मतासंसर्गेणान्वयइति। ओदनपाकानुकूलयत्नवानित्यन्वयबोधः स्यादित्यर्थः। ननु चैत्रस्तंडुलं पचतीत्यादौ नामा
र्थधात्वर्थयोः साक्षाद्भेदेनान्वयो व्युत्पन्न एवावर्णवाच्यः। तद्गीमातज्ञानादिमान्‌चैत्र इत्येव प्रतीतेरत आहवस्तुतइति॥ यद्वा सामान्य ८३
त एव नामार्थधात्वर्थयोः साक्षाद्भेदेनान्वयो न व्युत्पन्नः। न चौदनत्वप्रचतिलादौ कर्मतासंबंधेनान्वयः स्यात्। तत्रासाधुत्वनिश्चयेन प्रति
बंधात्तथा बोधासंभवात्॥ असाधुत्वनिश्चयाभावे तु तथा बोधस्येष्टत्वादित्यत आह वस्तुतइति॥ आख्यातार्थानन्वयमास इति॥ प्रथमांतपदोप
स्थाप्ये चैत्रादौ वाक्यार्थानन्वयमास इत्यर्थः॥ तस्या आख्यातार्थसंख्यायाः आख्यातार्थविशेष्यगामितादिति॥ भावनारूपाख्यातार्थगामित्वा विशेष्य४
दित्यर्थः। तदुक्तं कुसुमांजलौ॥ यं यं भावनानुधावति तंतं संख्यापीति छितिरिति॥ भावना च संख्या कातिरिक्त आख्यातार्थ इति॥ नन्वुक्त
भावनाविशेष्येनक्रियासंख्यान्वयः परंतु तद्विशेष्य एव करूत्याकोशायामाह विभक्त्यर्थेति॥ विभक्त्यर्थः कर्मत्वादिस्तद्विशेषणीभूतः प्रथ
मांतपदोपस्थाप्य इत्यर्थः। यथाऽत्र ते स्तोकं पचतीत्यादौ स्तोकपदार्थे भावनाविशेष्यत्वं स्यात्॥ तस्य नामार्थताद्विभक्त्यर्थविशेषणत्वात्॥
ग

न
स्तोकमितिद्वितीयायाः प्रयोगसाधुत्वार्थकत्वात्॥ विवक्षितमर्थमात्रपदोपस्थाप्यत्वाभावान्नविशेष्यत्वं॥ चैत्र इत्यौ सैत्रेण छत्री स्यादौ चैत्रेपि
प्रथमांतपदोपस्थाप्यत्वस्य सत्वाद्व्याप्तिवारणाय कर्मत्वाद्यविशेषणीभूत इति॥ इतरविशेषणीभूत इत्यर्थः॥ चैत्रस्य चैवार्थ्यविशेषणता
न दोषः॥ कर्मत्वाद्यविशेषणीभूतत्वस्य धात्वर्थविशेष्यकबोधजनके चैत्रेणस्थीयत इत्यादिभावाख्याते धात्वर्थेपि सत्वादित्याप्तिवारणा
य प्रथमांतपदोपस्थाप्य इति॥ तथा च विशेष्यतासंबंधेन भावनाप्रकारकबोधे इतरविशेषणीभूतप्रथमांतपदजन्योपस्थितिर्विषयतया
हेतुरित्यर्थः॥ तेनेति॥ आख्यातवाच्यसंख्यान्वयेभावनाविशेष्यता ओदनकर्मकपाकानुकूलकृतिमान् तस्य निपामकत्वेनेत्यर्थः॥ तथा
विधः॥ विभक्त्यर्थाविशेषणीभूतनामार्थः॥ तथा च चैत्रओदनं पचतीत्यादौ ओदनकर्मकपाकानुकूलकृतिमानेकश्चैत्र इत्यन्वयधीः॥ क
र्माख्याते भावनाविशेष्यदर्शयिततादृक्कर्माख्याते तद्दर्शयतिपच्यतइति॥ मैत्रेणौदनः पच्यत इत्यत्रेत्यर्थः॥ कर्म॥ पाकजन्यफलशालीओदनः॥
आश्रयाख्यातार्थविशेष्यत्वमनुपपद्यते। तथा च मैत्रनिष्ठपाकानुकूलकृतिमानेकश्चैत्र इत्यन्वयधीः॥ अत्र निष्ठत्वं तृतीयार्थः॥ आख्या
तार्थं कृतावेवान्वेति॥ तादृशकृतिश्चौदनेविषयतासंबंधेनेति॥ वस्तुतो मैत्रेणौदनः पच्यत इत्यादौ मैत्रनिष्ठकृतिविषयपाकजन्य
फलशालीओदन इत्येवान्वयबोधः। कर्माख्यातस्थलेकर्मणि क्रियाजन्यफलाश्रयत्वबोधस्यानुभाविकत्वात्॥ अत्रापि निष्ठत्वं तृतीया
र्थः। तस्य कृतावेवान्वेति॥ कृतिश्च विषयतासंसर्गेण पाके स च जन्यतासंसर्गेण फले तच्चाश्रयत्वसंसर्गेणौदने॥ न चात्र फलोपस्थितिः कुत इति
वाच्यं। कर्माख्यातसमभिव्याहारस्थले तु प्रथमं यवस्तुपस्थापनात्॥ अत्र कृतिरूपभावनाविशेष्यत्वमोदनस्यपरंपरयाबोध्यं तेनतत्राख्या
तवाच्यसंख्यान्वयोपपत्तिः भावनाविशेष्य एवाख्यातवाच्यसंख्यान्वयस्योक्तत्वादिति॥ स्थाली पचतीं वन्हिनोदनः पच्यतइत्यादि
ते३ चेतनत्वेनानुव्यापारेलाक्षणिकमाख्यातं॥ पाकानुकूलव्यापारवती स्थाली॥ वन्हिनिष्ठपाकानुकूलव्यापारवानोदनः वन्हिनिष्ठव्या
पारजन्यपाकजन्यफलशालीओदन इति वान्वयबोधः। स्थालीव्यापारोऽधःसंतापनादिः। वन्हिनिष्ठव्यापारश्चोर्ध्वज्वलनादिस्तद्वृत्ता
चौदनस्य साध्यत्वसंबंधेन। तत्साध्यत्वात्तस्य॥ अन्यत्सर्वंप्राग्वत्॥ भावाख्यातेनिरूक्तभावनाविशेष्याभावात्संख्याऽनन्वितैवे

३ तृतीयार्थः चैत्रेण पक्वः तंडुलः मैत्रेण पक्व निर्धारे तृतीयायास्तदर्थकत्वस्य कृप्तत्वात् तत्र कर्तृत्वं न ३

त्वात्कृत्या यतइत्यत्रेति ॥ चैत्रेण स्थीयत इत्यत्रेत्यर्थः ॥ स्थित्यनुकूलेति ॥ चैत्रनिष्ठस्थित्यनुकूला कृतिरिति भावनाविशेष्यकबोधे कस्यापि भा
स्था·मं· वनाविशेष्यत्वेनेत्याख्यातवाच्यसंख्यान्वितत्वे त्यर्थः ॥ अत्रापि निष्ठत्वं तृतीयार्थः ॥ स्थितेरनुकूलेति ॥ गगनेन स्थीयत इत्यादावन्वित
नस्थलेतु आख्यातमाश्रयत्वे लाक्षणिकं ॥ तथाच गगननिष्ठस्थित्याश्रयत्वमिति बोधः ॥ अतएव ॥ भावाख्यातस्थले संख्यायाअन
८४ न्वितत्वादेव ॥ औत्सर्गिकमिति ॥ प्रथमोपस्थितमेकवचनमेव साधुत्वार्थप्रयुज्यत इत्यर्थः ॥ भावाख्यातस्य भावप्रधानत्वात्तद्विशेष्य
कएव बोधस्तस्मादिति कस्यचिन्मतमाह धात्वर्थेति ॥ अन्ये चैत्रेण स्थीयत इत्यादिभावाख्याते ॥ अत्रापि निष्ठत्वं तृतीयार्थस्तच्च कृ
तावन्वेति ॥ कृतिश्च साध्यत्वसंसर्गेण धात्वर्थे ॥ इत्थं च चैत्रनिष्ठकृतिसाध्यास्थितिरित्यन्वयबोधः ॥ कश्चिदित्यस्वरसो बीजं मुख्यभाव
नाविशेष्यत्वस्य प्रथमान्तपदोपस्थाप्यस्य वक्तृत्वादित्वात् कृतिप्रकारकधात्वर्थविशेष्यकबोधासंभवइति ॥ एतत्सर्वं प्राचाम
तेन नव्यमते आख्यातमात्रस्य कृतिवाचकत्वात् ॥ नच कृतिवाचकत्वेतुल्ये कर्तृकर्माख्यातादिव्यपदेशः ॥ कथमितिवाच्यं ॥ यदु
पस्थाप्यकृतिर्विशेष्यत्वेन कर्तर्यन्वेति तत्कर्त्राख्यातं ॥ यदुपस्थाप्यकृतिर्विशेष्यत्वेन कर्मण्यन्वेति तत्कर्माख्यातं ॥ यदुपस्थाप्य
कृतिर्विशेष्यत्वेन धात्वर्थेन्वेति अनन्वितत्वा वा तद्भावाख्यातमिति व्यपदेशसंभवात् ॥ नव्यास्तु कर्त्राख्यातस्य कृतिरूपं क ८४
र्तृत्वं वाच्यं ॥ चैत्रस्तंडुलं पचतीत्यादौ तंडुलकर्मकपाकानुकूलकृतिमांश्चैत्र इत्यन्वयबोधात् ॥ कर्माख्यातस्य तु कर्मत्वमेव वाच्य
मनुकृतिः ॥ तत्र विवक्षितत्वेव केचित्फलमेव ॥ तथाहि ॥ क्रियाजन्यफलशालित्वं कर्मत्वं ॥ तत्र क्रिया धातुत्वलभ्यैव ॥ जन्यत्वं शालित्वं च
तत्संसर्गविधया वलभ्यते ॥ इत्थंच ॥ विशिष्टफलमेव तद्वाच्यं ॥ तथाच चैत्रेण पच्यते तंडुल इत्यादौ कर्तृत्वं धात्वर्थ एवान्वेति ॥ तयोश्च
चैत्रकर्तृकपाकजन्यफलशालित्वं इत्थं रसन्वयबोधः ॥ भावाख्याते तु वर्तमानत्वादिकमेव वाच्यं न संख्या न वा कृतिः ॥ य
था चैत्रेण सुप्यत इत्यादौ अत्रापि तृतीयार्थः कर्तृत्वं स्वाभावएवान्वेति ॥ तथाच चैत्रकर्तृकोवर्तमानः स्वापइत्यन्वयबोधः ॥ गग
नेन स्थीयत इत्यादौ तु निष्ठत्वमेव तृतीयार्थस्तदपि भावएवान्वेति ॥ तथाच गगननिष्ठा वर्तमाना स्थितिरित्यन्वयबोधः ॥ अत्रापि

स्य
मते आख्यातवाच्यसंख्या कर्मत्वाद्यनवरुद्धप्रथमान्तपदोपस्थाप्येभावनाविशेष्यएवान्वेति ॥ कर्माख्यातेपि फलरूपभावनाविशेष्यत्वं कर्म
णिसत्वात्तत्रैवसंख्यान्वयइतिन व्यभिचारः ॥ संख्याकाख्यातिरिक्ताख्यातार्थस्येवभावनात्वेन फलादेरपि सत्वादिसाकुः ॥ वैयाकरणास्तु क ६२
र्तृकर्मणिलकारवाच्ये ॥ लकार आख्यातं ॥ तत्र चैत्रः पचतीत्यादौ कर्तृत्वं तद्वाच्यं ॥ सच चैत्रे आश्रयत्वेनान्वेति ॥ आकृतत्र भिन्नत्वे नमति
बोधात् ॥ मैत्रेण पच्यते तंडुल इत्यादौ कर्मत्वं तद्वाच्यं ॥ तच्चाश्रयत्वेन तंडुलेन्वेति ॥ तृतीयायाः प्रकृत्यर्थं तु तत्र ॥ धात्वर्थ एवान्वेति ॥ इत्थं
च मैत्रकर्तृकपाककर्माभिन्नस्तंडुल इत्यन्वयबोधः ॥ आख्यातवाच्यसंख्यान्वयोपि कर्तृकर्मणोरेव ॥ सर्वत्र वाच्यगामित्वात् ध्रुव
त्वात् आख्यातार्थसंख्येति नियमात् ॥ आख्यातार्थकालस्तु धात्वर्थएवान्वेति ॥ पचतीत्यादौ पाकादौ वर्तमानत्वादिप्रतीतेः ॥ यदि च
कर्तृकर्मणोस्तद्वाच्यत्वेनइत्थं चैत्रः पचतीत्यादौ चैत्रे रतृतीया मैत्रेण पच्यते तंडुल इत्यादौ तंडुलपदोत्तरं द्वितीया च स्यात् ॥
तिङा कृतावानभिहिते कर्तरि कर्मणि च तृतीयाद्वितीये पाणिनिनानुशिष्टत्वादितिकृत्स्नं ॥ कर्तृत्वकर्मत्वयो
र्गुरुतया लाघवेन कृतिफलयोरेव तत्स्वपतावच्छेदकत्वात् ॥ नच पचतीत्यत्र कर्तरि तृतीयापत्त्या तत्र कर्मणि द्वितीयापाप तं८
त्तेत ॥ तिङादिनाकर्तृकर्मगतसंख्याभिधानस्यैव तृतीयाद्वितीययोर्नियामकत्वात् ॥ नचानभिहितेचेति सूत्रविरोधः ॥ त
स्यापि संख्याभिधानएवतात्पर्यादिति ॥ प्राभाकरास्तु चैत्रस्तंडुलं पचतीत्यादौ फलानुकूलविलक्षणव्यापारएव धात्व ७६
र्थः ॥ आख्यातार्थस्तु संख्याकालश्च ॥ ननु कृतिरननुभवात् ॥ तत्र धात्वर्थः प्रथमान्तपदोपस्थाप्ये साक्षात् भेदेनान्वेति ॥ स
ख्यापि तत्रैव ॥ कालस्तु धात्वर्थांशे तद्विलक्षणव्यापारे ॥ द्वितीयार्थो निष्ठत्वं तच्च धात्वर्थैकदेशे फलेन्वेति ॥ कश्चित्केचित्तु दानेन
यस्यापि स्वीकारात् ॥ इत्थं च तंडुलनिष्ठविक्लित्त्यनुकूलविलक्षणव्यापारवान् चैत्र इत्यन्वयबोधः ॥ कदाचित्सा कातुक
लयत्नवानितिबोधे तु लक्षणया पाकस्य यत्नसाध्यत्वानुमानाद्वा ॥ एवं च रथोगच्छतीत्यादावपि सुरथप्रयोगनिष्क्रमा स्तिकू २
वकर्माख्यातयोस्तु प्रागुक्तनव्यरीतिरेवाश्रितास्ताकृस्तदपिन ॥ नामार्थधात्वर्थयोः साक्षाद्भेदेनान्वयबोधस्याव्युत्पन्न
री

1. अन्यथा तत्प्रसंगस्य मूलकत्वं तु व्यक्तत्वादिति दिक्। तन्त्राख्यानस्य कृतावेव यदि शक्तिकल्पिघवात् २

कृ

न्या·मं· त्वात्॥ नदा कृतामपि तत्रैव सा स्यात्। पचति तत्रेव पर्के स्यादावपि पाकानुकूलकृतिमान्नित्यन्वयबोधस्य वक्तुं शक्यत्वादिति चेन्न॥ क
र्तृत्वे कर्तृत्वे च शक्तिर्न तु कृतिमात्रे अन्यथा भोक्ता तृप्यतीत्यादिप्रयोगानापत्तेः। भोजनानुकूलकृतौ तृप्त्यानुपपत्तेर्बोधात्। एवं कर्म
८५ त्वां कर्मत्वे च शक्तिर्न तु कृतिमात्रे फलमात्रे वा। अन्यथा पर्कृतं केइत्यादिप्रयोगानापत्तेः। पाकविक्लित्यकृतौ पाके जन्यफले वा भोज
नकर्मत्वबाधात्॥ मम मते तु भोजनकर्तरि तृप्त्याश्रयत्वस्य पाककर्मणि च भोजनकर्मत्वस्य सत्वान्न तत्प्रयोगानुपपत्तिः। दृष्टं चैवं प
ग५ क्वश्चैत्रः पक्वं तेमनमित्यादावभेदेनैवान्वयबोधः। तादृशबोधनियामकस्य समानविभक्तिकत्वस्य सत्वात्। भावकृतां च क्वादीनां
तु शब्दसाधुत्वमेवार्थः। भावः पाको गमनमित्यादौ धात्वर्थमात्रप्रतीतेरिति दिक्॥ आख्यातार्थसंख्यान्वये व्यवस्थाप्यतदर्थकाल्या
न्वये व्यवस्थापयितुमाक्षिपति स्यादेतदिति। एकत्वादेरिति॥ एकेनाख्यातपदेन कृतिवर्तमानत्वादौ रूपस्थापितत्वात् कृतावेव काल्या
य८ न्वय इत्यर्थः॥ तथा चाख्यातार्थकालप्रकारकबोधप्रतीतेन्नैककृत्सुपक्तिति विषयतया कारणमित्यर्थः। धात्वर्थेन तदन्वये पक्षे सेवमेव हेतुहेतु
मद्भावो बोध्यः। अन्यथा॥ धात्वर्थे आख्यातार्थकालान्वये कृतावाख्यातार्थः। कालो न्येतीति मते आक्षिपति स्यादेतदिति। पचति चैत्र इति।
विद्यमानपाकानुकूलकृतिः पाकिकृतिमतीति चैत्र इत्यर्थः। भाविकृतिप्रागभाववमिति। न च पाकानुकूलकृतित्वावच्छेदेन सविष्यत्वादेरन्वयान्न तथा
प्रयोगापत्तिरिति वाच्यं। तथासति कृतापि पक्ष्यतीत्यादिप्रयोगस्यानापत्तेः। पाकानुकूलकृतित्वाच्छिन्नप्रागभावध्वंसयोरिदानीमसत्वात्॥ ८५
न च प्रकृतपाकानुकूलकृतित्वावच्छेदेन तथान्वयः। एवं सति सर्वत्र धात्वो प्रकृतपाके लक्षणापत्तेः। आद्यकृतिप्रागभावस्यैवेति॥ तत्सतियो
क्ष्य८ गित्वस्यैवेत्यर्थः। एवमग्रेपि। एवं पक्षे तिङा पाक्षिदित्यादौ पाकानुकूलप्रागभावप्रतियोगिकृतिमान्। पाकानुकूलध्वंसप्रतियोगिचरमकृति
मानित्यन्वयबोधः। पचति चैत्रे चैत्र पक्ष्यतीत्यादिनानादृशान्वयबोधजननासमर्थत्वात्तादृशप्रयोगस्तिमावः। पचतीग छतीत्यादावाख्या
तार्थविषये च पिताधात्वर्थं विवेचयितुमाह अथेत्यादिना मिति॥ व्यापारविशेषकर्मत्वमिति॥ व्यापारविशेषानुकूलकृतिमत्त्वमित्यर्थः। फलानुकू
लतोपलक्षित इति॥ नन्वेवं कृत्स्नं अपचेदित्यरूपादिपरावच्छिन्नाधः संतापनस्य अपपास्य धातुकृत्त्वीकरणमात्रे धातो

स बा

र्लक्षणेति सिद्धान्तो व्याहन्येत। रूपादिपरावृत्त्यनुकूलत्वोपलक्षितताधःसंतापनस्य सत्त्वाद्धात्वादिने चेन्न॥ विलक्षणाधःसंतापन ८२
स्य अपपास्य च रूपरोधाग्रादौ फलकत्व्यासत्कृत्वा धातुस्वीकर्षेपमात्रे लक्षणायां उचितत्वेन सिद्धान्तभंगाभावादिति।
विलक्षणव्यापारमात्रे धात्वर्थत्वं त्वत्र शोकनेत्यन्तिति॥ एवं विलक्षणव्यापारमात्रस्य धात्वर्थत्वे। कर्ममात्रे शक्यमिति। कर्म
त्वमात्रं शक्यतावच्छेदकमित्यर्थः। तत्रां त्यजिगम्यो। कुतो न पर्यायतेति। एकप्रवृत्तिनिमित्तकत्वे सति भिन्नानुपूर्वीकत्वरूपप
र्यायत्वस्य तत्र सत्वादिति भावः। त्यजिगम्योः पर्यायत्वं स्वीकृत्यैव तादृशप्रयोगोऽस्ति वारयितुमाह नैवमित्यादिना गच्छतीत्यादि प५
समभिव्याहृतेति। तथा च तादृशाद्वितीयासहकृतगमेः संयोगावच्छिन्नक्रियाशाब्दबोधं प्रत्येव सामर्थ्यं। तादृशद्वितीयासहकृतः
त्यजेर्विभागावच्छिन्नक्रियाशाब्दबोधं प्रत्येव सामर्थ्यं॥ तेन ग्रामं गच्छतीति [struck-through] त्यजग्रामवृत्तिसंयोगजनकव्या
पारानुकूलकृतिमानिति ग्रामं त्यजतीत्यत्र च ग्रामवृत्तिविभागजनकव्यापारानुकूलकृतिमानित्येवान्वयबोध इति भावः। यथोक्तानि
प्रसंगनिरासादिति। तादृशव्युत्पत्तिबलेन वाक्यार्थबोधवैलक्षण्यात् तादृशप्रयोगापत्तिरूपस्य यथोक्तातिप्रसंगस्य निरासादित्य
र्थः। त्यजिगम्योः पर्यायत्वेपि प्रतिपाद्यवाक्यार्थतात्पर्यस्य भिन्नभिन्नत्वात्तादृशप्रयोगापत्तिः यथाकार्यतात्पर्यस्यापि शाब्दप्रयोगेप्र
तिहेतुत्वादिति भावः। नव्यसिद्धान्तमाहुः अपर्याकरकृतत्वं स्विति। अवच्छेदकमेवेति विशेषणमेव न तूपलक्षणमित्यर्थः। तथा च फला पा६
वच्छिन्नविलक्षणव्यापार एव धात्वर्थ इति भावः। घटात्स्वरस्तात्वाविवएकदेशान्वयमभ्युपेत्याह द्वितीयार्थस्त्विति॥ आश्रयता॥ आ
श्रयाश्रयिभावः। तथा चोदनपचति चैत्र इत्यादौ दोदनं निष्ठविक्लित्यवच्छिन्नव्यापारविशेषकर्ताचैत्र इत्यन्वयबोधो बोध्यः। एवं॥ आ
श्रयत्वस्य द्वितीयार्थत्वे। समभिव्याहृतधात्वर्थतावच्छेदकफलाश्रयत्वबोधं प्रति द्वितीयापदज्ञानं हेतुरिति व्युत्पत्तेरित्यर्थः। स्वं द्वितीयापदं।
अत एव॥ फलस्य धात्वर्थतावच्छेदकत्वादेव। गां त्यजति कर्मत्वलक्षणं दूषयति नहीति॥ तथापि। फलस्य धात्वर्थतावच्छेदकत्वादिनापि॥ प्र
तत्वर्थ इति॥ पतति धातौ रकर्मकत्वप्रापि विलक्षणव्यापारमात्रे शक्तत्वात्तत्र संयोगविभागरूपफलस्यावच्छेदकत्वाने गिक्काराद्दित्यर्थः।

त :

न्या·मं· अत एव फलानवच्छिन्नविलक्षणव्यापारवाचित्वं धातोरकर्मकत्वं॥ यथाप त्यादे। फलावच्छिन्नविलक्षणव्यापारवाचित्वं सकर्मकत्वं। यथाप आदे।:
न्ये नञ फलेयद्युभयत्रापीति तत्रात ज्ञानोद्धिकर्मकत्वं॥ घटमानयत्यादेः चैत्रोऽश्वं ग्रामं नयतीत्यादिवाक्योऽज स्वग्रामोऽभयति इस योगावच्छिन्नयना तरु
नुकूलकृतिमांश्चैत्र इत्यन्वयबोधोदयादिति। चैत्रो ग्रामं गच्छतीत्यादौ चैत्रे निरूढकर्मत्वस्यातिप्रसंगवारणाय हतधात्वर्थानधिकरणत्व
८६ तिविशेषणात्॥ कर्मत्वलक्षणे विशेषणात्॥ तथा च धात्वर्थानधिकरणत्वे सति धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वं। इदं च नव्यैर्वादिरिति भा
वः स्वीकुर्वन्तीति॥ दर्शितयुक्तिवकादिनिचोषः। एतेनेतन्मते निर्दुष्टमिति स्वचिते। शाब्दलक्षणानन्तरमाकांक्षादिनिरूपणे संगतिं दर्श
यति तस्य शाब्दस्येति॥ निराकांक्षा द्वाविति॥ घटः कर्मत्वमित्यादाविति सर्थः। आकांक्षादिकमित्यादिपदात् योग्यतासत्तिनात्पर्यसंग्रहः। सह
कारिति। शाब्दकार्यकारी त्यर्थः। तथा चैककार्यकारित्वं संगतिः। आकांक्षादिनिरूपणमिति भावः। सहकारी भाने तरमतस्तन्निरूपणत्वं
ति शेषः। तत्र॥ आकांक्षादिषु मध्ये। आकांक्षां लक्षयति यत्पदमिति। घटः कर्मत्वमित्यन्वयबोधजनकाकांक्षा वृत्ति घटमित्यत्र घटादिभिन्ने
कर्मत्वभेदान्वयबोधेप्याकांक्षास्यादत उक्तं यादृशानादृशान्वयविशेषणे। तदपेक्षणे संगमयति भवति हीति। तस्य समभिव्याहरति॥
तयोः। नामविभक्तिपदयोः समभिव्याहारः सहोच्चारणलक्षणं इत्यर्थः। नाम्नः स्वार्थेति। तत्र नामार्थनिष्ठकर्मत्वानुभवे प्रतीतत्वान्नामो
त्तरकर्मत्वोपस्थापकविभक्तिपदज्ञानहेतुः। एवं तत्त्वादृशानर्थगोचरकृत्यनुभवे प्रति तत्तत्कृत्युत्तरत्वमात्मादिप्रत्यक्षज्ञानहेतुः। समवा
यघटिते सामानाधिकरण्यप्रत्यासत्तिः। तेन पुरुषभेदेन न कार्यकारणभावभेदः। अयं च हेतुहेतुमद्भावसंस्कृतस्य एव॥ तेनता ८६
वि४ दृशसमभिव्याहारेणैवापूर्णंत्वाग घटकर्मकमित्यादिबोधेपि न क्षतिरिति। त्वं कते हेतेति। एवं॥ नामार्थनिष्ठकर्मत्वाद्यनुभवजनने कर्मत्वा
द्युपस्थापकद्वितीयादिविभक्तेर्धात्वर्थगोचरकृत्यनुभवजनने कृत्युपस्थापकाख्यातस्य सहकारित्वं। व्युत्पत्तिः। घटकर्मकानय
नानुकूलकृतिमानित्यन्वयबोधः। यत्र नामार्थनिष्ठकर्मत्वानुभवं प्रति कर्मत्वोपस्थापककर्मत्वपदज्ञानं हेतुः। एवं धात्वर्थगो
चरकृत्यनुभवं प्रति कृतिरिति पदज्ञानं हेतुरिति कार्यकारणभावज्ञाने न्यूनत्वमिति शाब्दार्थः। ततः घटः कर्मत्वमित्यादिवाक्यात्॥

ना धा

कारणविरहादिति॥ कारणस्य नामविभक्तिसमभिव्याहारस्य समभिव्याहारस्यानतसमभिव्याहारूपस्य विरहादित्यर्थः। एतस्याः निरूढाकाः।
मा २ ज्ञानमिति। क्रमप्रभृतिसाधारण्यो निश्चय इत्यर्थः। एतत्संशयेऽन्वयबोधाभावादिति भावः। तद्भेदेको तिअयमेति पुरुषो राजन्नः पुरुषोपधी
सार्थतामित्यादौ राजत्वस्य पुरुष इत्यनेन सहाकांक्षाभ्रमेणापि राजसंबंधिपुरुषोपस्थार्यतामित्यन्वयबोधादित्यर्थः। द्वितीयामा
कांक्षा निर्वक्ति अपरा चेति। प्रकृतेति। प्रकृततदुद्देश्यान्वयबोधस्तत्समानाकारायाम् ज्ञान्यान्वयबोधस्तद्विरहस्त्यर्थः। अर्थेमा त्रस्वं
कांक्षात्वेनाभिमतं पदं॥ स्वरूपसती। अज्ञायमाना। हेतुरिति तथा चानुमितौ समानाकारसिद्धेरिव शाब्दबोधेपि समानाकारश
ब्दसिद्धेः समवायघटितसामानाधिकरण्येन प्रतिबंधकत्वे। तस्माव शाब्दबोधहेतुरतएव जनितान्वयबोधाद् घटमानयतीतिवा
क्यात् तच्छाब्दबोधानन्तरमिति भावः। दंडेनेत्यन्वयबोधः इति। दंडकरणकं गोकर्मकमानयनमिति महावाक्यार्थबोधः इत्यर्थः
योग्यतां निर्वक्ति योग्यताचेति। अयोग्य इति॥ फलोपधानशून्यमित्यर्थः। प्रबद्धमत्वेनेत्याप सेककर्मयोग्यतायाः सत्वा
दिति भावः। तद्भ्रमेणेति। वह्निना सिंचतीत्यादौ योग्यताभ्रमेण वह्निकरणकसेकानुकूलकृतिमानित्यन्वयबोधादित्य
र्थः। अप्रत्वात्॥ शाब्दबोधात्पूर्वमज्ञातत्वात्॥ प्रथमं। प्राथमिकशाब्दबोधात्पूर्वमित्यर्थः। घटमानयतीति वाक्येन प्रथमं
शाब्दबोधानन्तरं तस्यैव पुंसस्तज्ज्ञातिपवाक्येन तत्रैव शाब्दबोधान्तरजनने योग्यतायाः स्मरणसंभवादिति भावः। तन्निश्चयोपि॥
योग्यतानिश्चयोपि। यद्वेति॥ प्रत्यक्षेणादृश्यमानपक्षेपि घटोस्तीति वाक्यार्थबोधे तत्र योग्यतानिश्चयोस्तीत्यर्थः। नन्व
मतमाह परेत्विति॥ असंसर्गग्रहः। पयसा सिंचतीत्यादौ पयः सेककरणतावच्छेदसंसर्गग्रहः। प्रतिबंधकस्तदभावो योग्यत्वेस
र्थः। हेतुत्वावधारणादिति॥ तथा च संसर्गरूपयोग्यताज्ञानहेतुत्वे चादिनोपि॥ असंसर्गग्रहाभाव आवश्यककल्प इति नवैवातिगौर
वमिति भावः। अभिधेयत्वप्रतियोगित्वेनेति। घटनिष्ठासत्ताभावोऽभिधेयत्वप्रतियोगिकः इति॥ तथा रूपस्यासंसर्गग्रहस्य प्रसि
द्ध्या तदभावोपि प्रसिद्ध एवेत्यर्थः। तथा च तत्स्त्तानं प्रमितदभावज्ञानस्य समानविषयकत्वेनैव प्रतिबध्यप्रतिबंधकभावे

न्या·म· तिभावः। ननुकत्मस्य दोषाधीनत्वाद्दोषस्य चास्मार्वत्रिकत्वात्सर्वत्रकेवलान्वयिन्याकोरूपाप्रसिद्धेरत आह यदीति॥ तच्चाघटो
भिधेयः रत्निवाक्यस्थलीयशाब्दबोधे किंचिदिति। कृतलेघटोस्तीत्याकारकपदियशाब्दबोधेस्तत्वेघटोनास्तीत्याकारकघटीयान्व
यविरहनिश्चयः प्रतिबंधकस्तत्सत्त्वे तत्र बोधेकारण्यलिति विशिष्येव कार्यकारणभावान्न व्यभिचारइत्यर्थः॥ आहुरित्यस्वरसो
८ भीचनेनतद्बिजंतुरूपकाशेमुखेन चंद्रइत्यसंसर्गग्रहेपित्रवेचंद्रमुखेदुभिन्नतीते जायमानत्वात्तच्छाब्दान्यतमत्संवृद्धयन्न संसर्ग
ग्रहस्य न तिबध्यतावच्छेदकेदेयं॥ तथा चयत्राद्धताचच्छिन्नेप्रतीतस्याप्रतिबंधकत्वात्तद्वदभावत्वेनहेतुत्वकल्पनामपेक्ष्य लाघवा
द्योग्यताज्ञानत्वेनैवहेतुत्वकल्पनायाउचितत्वादिति केचित्॥ तन्न। रूपकादौ मुखेचंद्राभेदप्रतीतेराहार्यतयाऽसंसर्गग्रह
प्रतिबध्यत्वाभावेन लौकिकसाक्षात्काराप्रतिरिक्तपित्रादिदोषाजन्याना हार्यत्वविशिष्टज्ञानमात्रे संसर्गग्रहाभावस्य
हेतुतायाः क्लृप्तत्वेनयोग्यताज्ञानहेतुत्वस्याक्लृप्तस्य कल्पनाया अनुचितत्वादिति॥ आसत्तिं निरूपयति आसत्तिरिति॥
प पदाव्यवधानमितिजन्वयप्रतियोग्युपस्थापकयोरव्यवधानमित्यर्थः। यथाकृतस्य गिरिर्भुक्तमग्निमान्देवदत्तेनेत्यना ८१
सत्त्वातिव्याप्तेः॥ अतएव॥ निरुक्तासत्तेः सत्वासत्वाभ्यामेव॥ एवं॥ पदाव्यवधानस्यासत्त्वे॥ प्रकृतान्वयबोधेति॥ उ
द्देशान्वयबोधेत्यर्थः॥ यथाकृतलक्षणमादायशंकतेनचेवमिति॥ प्रकृतान्वयबोधानुकूलपदव्यवधानाभावस्य चि
वक्षितस्य श्लोकादावपि सत्वात्॥ तत्र सर्वपदानां प्रकृतान्वयबोधानुकूलत्वमत्वादिति भावः। ननु निरुक्तासत्तिभ्रमेदेव
श्लोकादावन्वयबोधइत्यत आह अव्यवहितेति॥ आसत्तिः पदाव्यवधानमितिप्राचीनलक्षणंदूषयन्नेवनव्यमतमा
हवस्तुतस्त्विति॥ तत्पर्यज्ञाने च सतीति। अव्यवहितपदत्वार्यज्ञाने च सतीत्यर्थः॥ तद्विलंबेन। पदाव्यवधानरूपासत्तिज्ञान
विलंबेना अविलंबितेति। अन्वयबोधविलंबाभावाद्वित्यर्थः। नेतत्ज्ञानमिति॥ पदाव्यवधानरूपासत्तिज्ञानेनान्वयबोध
हेतुरित्यर्थः॥ किंत्वव्यवहितेति॥ अव्यवहितपदत्वार्यमात्रसन्निहितत्वज्ञानेकारणमित्यर्थः॥ तद्धव्यवहितपदत्वार्यचेन

बा२

८क्रमोत्पत्तिकानामित्यर्थः आशुविनाशिनां युगपदुत्पन्नानां मीलनसंभवादुक्तं क्रमिकाणामिति८

चाग्निरिर्भुक्तमग्निमान्देवदत्तेनेत्यादावव्यवहितपदत्वार्थज्ञानसत्त्वेऽन्वयबोधापत्तिरितिवाच्यं॥ इष्टत्वात्। न चैव श्लोकादौ यो स्र२
जनाव्यर्थत्वस्यात्। अव्यवहितपदत्वार्यग्राहकत्वेनतदावश्यकत्वादिति। अतएवश्लोकस्यार्थंदर्शयतीत्यवकुरिति। ननु तत्कवाक्ये नि
रुक्तासत्तिर्नस्यात्॥ शुकस्याव्यवहितपदत्वात्पर्याभावादित्यत आह पूर्ववाक्ये चेति। नव्यमतेदूषयतितदपिनेति। सत्यर्थेति।
इदंपदं एतत्पदार्थान्वितस्वार्थपरमित्यर्थः तात्पर्यज्ञानादावित्यर्थः॥ आदिना आकांक्षादेः परिग्रहः॥ एतद्विलंबेनेति॥ अ
व्यवहितपदत्वार्थरूपासत्तिज्ञानविलंबेनेत्यर्थः। स्वमत दर्शयति तस्मादिति॥ निरुक्तासत्तेर्हेतुत्वग्राहकंव्यतिरेकं दर्श
यतिनहीति॥ पदार्थोपस्थितिर्न वाक्यार्थबोधहेतुः संभवतीति चतुरादिपदघटितवाक्ये तत्र सहार्योपस्थितिर्नानेकदाभ्य
त्वात्। तथा च नेयमासत्तिरित्यपि प्रायेण संकेतेनत्विति॥ आशुविनाशिनामिति॥ तत्तोपक्षणवृत्तिध्वंसप्रतियोगिनामि
त्यर्थः। क्रमिकाणामिति॥ तादृशानामपि घटपटादीनां मिलनसंभवादुक्तमाशुविनाशिनामिति॥ तावत्पदार्थोपस्थितिना
माद्यंप्रत्यक्षसिद्धं॥ द्वितीये चेत एकदानानाज्ञानोत्पत्तेरनभ्युपगमात्॥ अन्यथा मनोचैभवं वादिनोभिमांसकाद्वविजयेरन्ति
ति॥ क्रमिकपदानुभवजन्येति। न चक्रमिकाशुविनाशिवर्णसमूहात्मकपदानुभव एव कथंस्यादितिवाच्यं॥ पूर्वपूर्ववर्णानुभव
जनितसंस्कारसहकृतचरमवर्णसंबद्धश्रोत्रेणपदानुभवस्य संभवात् प्रत्यभिज्ञाप्रसक्तेसंस्कारसहकृतेंद्रियजन्यत्वदर्शना
दिति॥ अतएव त्वत्स्यार्थंदर्शयति तत्तायोतेति॥ ननुनतदेयपर्थं॥ अन्यथाऽसहोच्चारितपदघटितघटमानयेतिवाक्ये व्यवहि
तोपदार्थोपस्थितावप्यन्वयबोधः स्यादत आह व्यवहितेति। विनाशादिति॥ तथा च तत्र सहार्थविषयकशाब्दबोधेतत्रस्यार्थोप
स्थितेर्हेतुत्वाचशक्तान्तुपस्थितिविरहादेवतत्रनान्वयबोध इति भावः॥ तात्पर्यंलक्षयति तात्पर्यं चेति॥ सैंधवमानयेत्यादौ सैं
धवपदमानयनेलवणान्वयबोधस्यात्पत्तिर्वा काश्यपस्येति छायाः मतादसत्वाप समन्वयः। अत्यसूत्रापरति घटमानयेत्यादौ घ
टपदंज्ञानयनान्वितस्वार्थपरं नवेति तात्पर्यसंदेहे घटपदमानयनान्वितघटपरं नेतिनिश्चये च घटकर्मकमानय

म्या कं ८८ ते आस्यामि॰

नमित्पन्न्यबोधाभावात्तदन्वयबोधे तात्पर्यनिश्चयो हेतुः॥ यत्संग्राह्य व्यतिरेकनिश्चयौ च प्रतिबंधकौ तु लिखयुक्ता अहेतुरनुमितौ व्या
प्तिरिवेति सामान्यमाहेरित्यर्थः। एतेन सैंधवमानय सा हो नानार्थे स्थले क्वचिदश्वस्य क्वचिल्लवणस्यैव बोध इति व्यवस्थितयेत्तात्पर्य
ज्ञानं हेतुरस्तु घटमानयेत्यादिवाक्यार्थः बोधे तु तद्धेतुत्वे तु मानाभाव इति पुरास्तं। उक्तनियमेन सर्वत्रैव तद्धेतुत्वसिद्धेरिति। न
नु तात्पर्यप्रमाणेनैव हेतुत्वमस्तु तन्मतसाधारणनिश्चयत्वेनेत्यत आह तद्भ्रमे चेति। लवणपरसैंधवपदप्रयोगेऽपि इदंपदं आनय
नान्वितान्वयपरमिति तात्पर्यभ्रमेऽप्यश्वकर्मकमानयनमिति बोधात्तन्निश्चयत्वेनैव हेतुत्वमिति भावः। इति शब्दं विभजते सोऽयमिति॥
तत्र॥ विध्यर्थवादयोर्मध्ये। विध्यभिधायकः प्रत्ययो विधिरित्येकं लक्षणं। विधीयते विधिरूपशब्देन प्रतिपाद्यते सो विधिरिष्टसा
धनत्वादिस्तमभिधायको वाचकः प्रत्ययो लिङ् तव्यादिः स विधिपूर्ववाच्य इत्यर्थः। अत्र प्रत्ययत्वं सुवादेर्गतमतो विध्यभिधाय मात्रे॰
क इति। तात्पर्यं वेदमिष्टसाधनमित्यादिश्रेष्ठगतमत अन्यथेति॥ मीमांसकादीनां मतं तेषां दिवा बुध एव विधिमवहा
रात्तत्त्वाधारणाय लक्षणांतरमाह तद्घटितवाक्यत्वेति। तद्घटितप्रत्ययघटितवाक्यत्वेत्यर्थः। अत्रेष्टं भट्टमते। प्रेरणापरता
मिका प्रवर्त्तनैव विध्यर्थः। तद्ज्ञानमेव प्रवर्त्तकं कुतो लीप प्रवर्त्ते। तस्या हेतुत्वावधारणात्। गामानयेत्याचार्यवाक्यश्रवणा
नंतरं शिष्यप्रवृत्तौ आचार्यप्रवर्त्तनमवगम्य प्रवर्त्तत इति सार्वजनीनव्यवहारात्। सा च प्रवर्त्तना ओदनकामः पचेतेति पुरुषप्रणी
तवाक्ये पुरुषनिष्ठैव। यजेत स्वर्गकाम इत्याद्यपौरुषेयवाक्ये पुरुषाभावात्तच्छब्दनिष्ठैव। वेदस्य नित्यत्वेन पुरुषप्रणी ८८
तत्वाभावात्॥ न चेश्वरकर्तृकत्वं वेदस्येति वाच्यं। तदनभ्युपगमात्। अत एव शब्दनिष्ठत्वात्सा शाब्दीभावनेत्युच्यते। तदुक्तं॥
अभिधाभावनामाहुरन्यामेव लिङादयः। अर्थात्मभावनात्वन्या सर्वाख्यातस्य गोचर इति। अभिधीयते येऽनये त्वभिधा
शब्दस्तन्निष्ठं भावनां लिङ् [illegible] दय आहुः। अर्थो धात्वर्थस्तत्संचरामा भावनार्थात्मभावना व्यापाररूपा अन्या विज्ञा
तीया आख्यातत्वेनरूपेण आख्यातवाच्येत्यर्थः। तन्मते क्रियानुकूलव्यापार एवाख्यातशक्ते इति कारिकार्थः। इष्टत्वेन

२ हेतुरूपेण लिङा २

हेतु॰ धे॰

जेतेति लिङा लिङ्गत्वेनरूपेण शाब्दभावनैवोपस्थाप्यते। उपस्थितया च तया यागादौ प्रवर्त्ततेऽनुमानितिः। तद्विवच लिङा स्यात्तेन
रूपेण यागप्रवृत्तिरूपार्थभावनैवोपस्थाप्यते तयाच साधिते न यागेनोद्देश्यस्वर्गसिद्धिः। स्वर्गमुद्दिश्य यागादौ पुरुषस्य प्र
वृत्तेरिति। अत्र च मते प्रवर्त्तनापरीक्षात्मिका ता शब्दनिष्ठतां संभवः। तस्माच्छ्रेयतेन धर्मत्वात्॥ अपरदोषयोतिरस्कृतेः स्वस्ते इच्छेत न
हि तत्र मानाभावः। न च प्रवृत्त्यन्यथानुपपत्तिरेव मानं॥ स्वर्गादिरूपेष्टसाधनत्वज्ञानादेव प्रवृत्त्युपपत्तेः। स्वेष्टसाधनत्वमसत्या प्रेरणास्व
रूपेणापि प्रवृत्त्युसंभवादिति तोऽसंभवृत्तिकमते तन्मतमुपेक्ष्य साधनत्वे विध्यर्थ इति सिद्धांतं पितुः प्रकारमे वृत्तयेपहत्वेनो
पन्यस्यति अभिधाय विधिश्चेति। विध्यर्थश्चेत्यर्थः। न चापीदं पक्षो न प्राभाकरमतावलंबेन। तन्मते सर्वस्यैव विध्यर्थत्वादिति
वाच्यं। कार्यत्वविशिष्टस्येव पूर्वत्वेन तन्मते विध्यर्थत्वात् विशेषणोद्वाः कार्यत्वमपि तदर्थ इत्यभिप्रायात्॥ प्रागभावप्रतियोगित्वरू
तीर॰ पकार्यत्वज्ञानात्प्रवृत्तिर्न संभवेदिति न कार्यत्वं विध्यर्थ इत्यत आह तच्चेति। किं मतेति॥ कृतिसाध्यत्वरूपं कार्यत्वं विध्यर्थ इत्य
त्र किं मानमित्यर्थः। तदनुप्रवृत्तेरिति॥ कृतिसाध्यत्वेन प्रकारकेच्छानुत्पत्तेरित्यर्थः। ननु चिकीर्षायां कृत्यसाध्यत्वप्रकारकज्ञानस्य
प्रतिबंधकत्वान्तरभाव एव तत्र हेतुरिति मतं निराकरोति नाविति गौरवादिति। कृतिसाध्यत्वज्ञानापेक्षया कृत्यसाध्यत्वज्ञाना
भावस्य गुरुत्वादित्यर्थः। ननु गुरुत्वं तस्यापि प्रतिबंधकाभावस्यावश्यकत्वात् एव हेतुरस्तु कृतं लघुनापि कृतिसाध्यत्वज्ञानेनेत्य
तो दोषांतरमाह सर्वेति॥ कृतिसाध्यत्वज्ञानात्सर्वेच्छापामपीत्यर्थः। चिकीर्षेति। कृतिसाध्यत्वप्रकारकेच्छेत्यर्थः। तत्त्वत्वात्॥
कृत्यसाध्यत्वज्ञानाभावसत्त्वात्। अत इति विधेः प्रवर्त्तकत्वान्यथानुपपत्तेरित्यर्थः। एवं। कृतिसाध्यत्वज्ञानस्य प्रवृत्तिहेतुत्वे। मंडली
कुर्यादिति। मंडलीकरणं हि बोधाधारविषयकं तत् कर्मविशेषः। बोधा [illegible] ति त्वद्ध्वताय तनेति लतदुःखमयं मंडलीं कुर्वीतेति न
शाकारः। मंडलीकरणे बलवदनिष्टजनकमिति ज्ञानासत्त्वे प्रवृत्तिर्विप्रपत्तिरेव स्यादत आह बलवदनिष्टाजनकत्वे चेत्यादि॥
मंडलीकरणे प्रवृत्तिवारयितुं शंकेतस्येति॥ इष्टमपीति॥ बलवदनिष्टाननुबंधिकृतिसाध्यताज्ञानस्य प्रवर्त्तकत्वापीत्यर्थः॥

हि३

न्या॰मं॰ अत्र आभाकरेति। आभाकरमतदूषणे तन्मतानुवर्त्तिनः समादधतस्त्यर्थः। नित्ये संध्योपासनादौ। रागेणादिमत्वेति। आदिना विहितकालजी
वित्वसंग्रहः। शुचिविहितकालजीविन एव नित्ये कर्मण्यधिकारित्वात्॥ प्रयोगश्च। अहरहः कृतिसाध्यं संध्यावन्दनं संध्यासमये रागेणादिम
८९ त्वाद्दर्शसंध्यायामिहमिवेति। एतदनुमानजन्यकार्यत्वबोधानंतरं संध्योपासने मत्कृतिसाध्यमितिमानसो बोधस्ततस्तत्र प्रवृ
त्तिः। आनुमानिकबोधस्य प्रवृत्तिविषयविशेष्यकत्वाभावेनाप्रवर्त्तकत्वादिति भावः। अन्यत्रापि काम्ये यागपाकादौ इष्टसाधनताज्ञा
नजन्यमिति। पाको मत्कृतिसाध्यः मत्कृतिं विना असत्त्वे सति मदिष्टसाधनत्वात् मत्कृतिसाध्यभोजनवदिति अनुमानविधया त
ज्जन्यमित्यर्थः। वृष्ट्यादौ व्यभिचारवारणाय हेतौ असत्त्वेति। इदं विषमितिज्ञायमानविषभक्षणे व्यभिचारवारणाय विशेष्यं॥
पक्षीकृतानागतपाकादेर्ज्ञानं तु अयं कालः पाककृत्याकाव्यवानुकालत्वादिरस्त्वनुमानात्। अयं पाकः पाककर्तृवृत्तिपाकत्वादिरत्वनु
मानात्। ननु पाकत्वादिसामान्यलक्षणया तन्मते तदसत्वादिति वक्तुं तत्र पक्षीकृतपाकादौ पूर्वं इष्टसाधनत्वं ज्ञायते तद्वृत्तत्र कृति
साध्यत्वज्ञानोत्पत्तौ बाधकाभावः। स्वकृतिव्यतिरेकप्रयुक्तव्यतिरेकित्वज्ञानस्य सत्वात्। तथा च इष्टसाधनताज्ञानजन्यं कार्यताज्ञा
नं न प्रवर्त्तकं किंतु मदिष्टसाधनकालीनं मे यत्नज्ञानमिति। अत एवाग्रे स इष्टसाधनताज्ञानकालीनं वेत्युक्तं॥ प्रवृत्तित्वाव ८९
च्छिन्नस्याकस्मिकत्ववारणायाह प्रवृत्तिसामान्येति। न कश्चिद्दोष इति। ममेष्टं उत्ती कारणाद्दोषप्रवृत्तिरित्यर्थः। कृतिसाध्यताज्ञान
सत्वेपि इष्टसाधनताज्ञानजन्यकार्यताज्ञानस्य विशेषहेतोरसत्वादितिभावः। एवं नित्यकाम्यस्थलीयप्रवृत्तौ तादृशकार्यताज्ञा
नहेतुत्वे हेतुहेतुमद्भावद्वयकल्पने। लाघवादिति। प्रवृत्तित्वावच्छिन्ने इष्टसाधनताविषयककार्यताज्ञानत्वेन हेतुत्वस्य एकस्यैव कल्पने
लाघवादित्यर्थः। नित्यस्येति। संध्योपासनादौ इष्टसाधनताविषयककार्यत्वज्ञानाभावादित्यर्थः। तत्रेष्टस्यैवासत्वादिति भावः। न
नु काम्यस्थलीयप्रवृत्तावेव तज्ज्ञानं हेतुरस्त्वित्यत आह साध्यत्वेति। एकस्मिन्नेव वस्तुनि साध्यत्वसाधनत्वयोर्ज्ञानं भिन्नभिन्नपुंसः
संभवत्येवेत्यतउक्तमेकस्येति। पुंस इति शेषः। एकस्यापि पुंसो भिन्नभिन्नवस्तुनि साध्यत्वसाधनत्वयोर्ज्ञानसंभवादुक्तमेकस्मिन्निति॥

साधनत्वं हीति। नियतद्रव्यवृत्तित्वं हीत्यर्थः। साध्यत्वं चेत्यर्थः। नियतपश्चाद्भावित्वं चेत्यर्थः। तत्त्वात्। यागादि। द्रव्यपदं दृष्टीकृत्य सिद्धांतमाहान्येति।
द्रव्यपदेत्यर्थः। नव्यासिद्धांतस्याग्रे वक्ष्यमाणत्वात् दुःखं जरदिति। प्रवर्त्तकमिति। प्रवृत्तित्वावच्छिन्ने कारणमित्यर्थः। अतिगौरवादिति। इष्टसा
धनताज्ञानजन्यकार्यताज्ञानत्वरूपकार्यतावच्छेदकेनान्यथासिद्धनियतपश्चाद्भावित्वरूपजन्यत्वप्रवेशेनातिगौरवादित्यर्थः। फलश्रु
त तेरिति। संध्यामुपासते ये तु सततं संशितव्रताः। विधूतपापास्ते यांति ब्रह्मलोकमनामयमित्यादि फलश्रुतेरित्यर्थः। यत्रन्वेति। नित्य इति शे
षः। विश्वजिन्न्यायादिति। यथा विश्वजिता यजेतेति वाक्ये फलविशेषश्रवणाभावात्सामान्यत एव विधिना विश्वजिन्नामको यागः इष्टसाध
नमिति बोधितेपि फलविशेषसाधनताज्ञानाभावेन प्रवृत्त्यनुपपत्तेः संभवाविशेषात् फलत्वे कल्प्ये चित्त्वात् स्वर्गस्याभ्यर्हितरूपत्वादगु
रुत्वान्वयाभपश्चाद्द्वेष्योगोपप्रयोजनत्वात् स्वर्गफलकत्वं सर्वाभिलषितः स्वर्ग एव फलत्वेन कल्प्यते तथा प्रकृतेपीत्यर्थः। ननु विश्वजितो नित्यत्वा
न्याये भावान्नित्ये फलकल्पनमनुचितमत आह अपरत्वायेति। नित्यत्वेपि प्रत्यवायपरिहारः सिद्ध एव तस्य तत्फलत्वमात्रे
कल्प्यत इति भावः। एवं नित्यस्यापि फलत्वे॥ तदपि। नित्यं संध्योपासनाद्यपि। किं तु यद्दकरण इति। प्रत्यवायसाधनिमित्तत्वात् प्र
तियोगित्वे नित्यत्वमित्यर्थः। न चैनैमित्तिके राहूपरागस्नानादौ अतिव्याप्तिस्तत्रदकरणेपि प्रत्यवायस्य प्रामाणिकत्वादिति वाच्यं॥
नियतनिमित्तकत्वं नित्यत्वमिति विवक्षितत्वात्। संध्योपासनादेः प्रातरादिसमयस्य नियतस्यैव निमित्तत्वात्। नैमित्तिकत्वं चानिय
तनिमित्तकत्वं उपरागस्नानादौ राहूपरागस्यानियतस्यैव निमित्तत्वात्। न च निमित्तत्वं प्रयोजकत्वं यागादेः काम्यत्वं च कामना
धीनकर्त्तव्यताकत्वमिति विवेकः। तच्चेति। निरुक्तनित्यत्वं चेत्यर्थः। एवं नित्यस्यापि फलकामनाधीनकर्त्तव्यताकत्वे। प्रवृत्तिर्नस्या
दिति कामस्थलीयप्रवृत्तिहेतुस्तत्फलकामनायाः असत्वात् प्रवृत्तिर्नस्यादित्यर्थः। इष्टापत्तिमेव विघटयति नहीति॥ नित्यस्य फलवत्त्वे बाध
कमाह कृतेनान्वेति। एवं नित्यस्यापि फलत्वे। कामना। फलकामना। अशुचेरिवेति। अशुचिना कर्मकर्त्तव्यमिति स्मरणात् अशुचेरनधिकारा
न्नित्याकरणेन प्रत्यवायजनकमिति वदित्यर्थः। प्रत्यवायो न स्यादिति। अधिकृतेनाधिकार्याकरणस्यैव प्रत्यवायजनकमितिवदित्यर्थः॥
ति॰

कथमन्यथेति

न्या॰मं॰ प्रत्यवायो न स्यादिति। अधिकृतेनाधिकार्याकरणस्यैव प्रत्यवायहेतुत्वात् अप्रत्यवायो न स्यादित्यर्थः। इष्टं च नित्यस्य फलत्वं तदभावे एवं वाच्यत्व
था च नेष्टसाधनत्वं विध्यर्थ इति भावः। शुचिनेति स्मरणात्। ज्ञो चादिमतः कामनाभावेपि प्रत्यवायोत्पत्तेर्वेत्येवं रूपमाशंकितुरभिप्रा
१० येण हीतास्समाधत्ते यदिति। तज्जन्यतामिति। नित्यस्य स्वर्गवन्निवेशः। प्रमाणिकत्वादिति॥ संध्यामुपासीतेत्यस्यागमसिद्धत्वादित्यर्थः। ननु
नित्ये यदि फलकामनानाधिकारिविशेषणं तदा कामनाशून्येनापि पुंसा संध्योपासनादिप्रसक्तौ दृष्टसाधनताज्ञानस्य प्रवृत्तिहेतुता
यां व्यभिचारः। तत्फले कामनायाः असत्वेऽपि इच्छाविषयफलसाधनताज्ञानस्यासत्वादित्यस्वरसादाह कल्प्यतां वेति॥ कामनेतरेति फल
कामनेतरेष्याधानधिकारः शुचिविहितकालजीवित्वादि तद्रूपामित्यर्थः। तथा च फलकामनायामप्यधिकारिविशेषणत्वान्नत
छून्यपुंसः संध्याद्यनुष्ठानमिति न प्रवृत्तिरिष्टसाधनताज्ञानयोर्हेतुहेतुमद्भावे व्यभिचारः। कामनेतरयावदधिकारवत्तां तदक
रणस्य प्रत्यवायहेतुत्वाभ्युपगमेनान्यकामनाभावे तदकरणे च प्रत्यवायोत्साहोपि संगच्छत इति सर्वं सुस्थमिति भावः। प्रागुक्तसा
२८ ध्यत्वसाधनत्वयोर्विरोधं परिहरति नहीति। एकस्मिन्पाके ओदनसाधनत्वहेतुसाध्यत्वयोरसत्वेऽपीत्यर्थः। ननु यदि साध्यत्व
साधनत्वयोर्विरोधस्तदा घटादेः स्वप्रत्यपि साधनतापत्तिरिति चेन्न॥ एककालावच्छेदेन साध्यत्वसाधनत्वयोर्विरोधस्याभ्यु ति॰ ७
पगमात्॥ पाकादौ च फलसाधनत्वकृतिसाध्यत्वयोर्भिन्नभिन्नकालावच्छेदेनैव स्वीकारात्॥ अत एव वाजपेयेन यजेत स्व १९
र्गकाम इत्यादौ वाजपेयशब्दः कर्मनामधेयं। साध्यतार्थकत्वात्। यया वाजिमन्नपेयं यवागूरूपेत्त साध्यत्वविशिष्ट्याने स्वर्गरू
पेष्टसाधनत्वान्वयस्यासंभवात्॥ वाशिष्ट्यस्य कर्मत्वलेखपर्यवसानात्। कर्मनामधेयपक्षे च वाजपेयनामको यागः स्वर्गसा
धनमित्यन्वयधीः ततीयाचशब्दसाधुतार्थिके वेति॥ नन्विष्टसाधनत्वविशिष्टकृतिसाध्यत्वज्ञानस्य प्रवर्तकत्वे मधुविषसंपृक्तान्न हे ३
भोजनेपि प्रवृत्तिः स्यादित्याह कृतिसाध्येत्यादि॥ बलवदनिष्टेति। बलवदनिष्टं मरणादि दुःखं तेन तत्साध्यं नानुबन्धित्वमजनकत्वं विशेषणमि
त्यर्थः। अजनैयायिकसम्मतमुपसंहरति एवं चेति कृतिसाध्यत्वेष्टबलवदनिष्टाननुबन्धिकारिविशेषणत्वान्नतच्छून्य

८

पुंसः संध्याद्यनुष्ठानमिति न प्रवृत्तिरिष्टसाधनताज्ञानयो बंधीष्टसाधनत्वयोर्विशेषणाभेदे वेत्यर्थः। विधिरपि प्रवर्तकत्वात् द्विध्यर्थोपि स एवे
त्याह विध्यर्थोपीति॥ अत एव विध्यर्थे बलवदनिष्टाननुबन्धित्वस्य विशेषणत्वादेव वेद्यर्थनिषेध इति॥ कलंजभक्षणं बलवदनिष्टा
ननुबन्धीष्टसाधनत्वविशिष्टकृतिसाध्यत्वाभाववदिति स्वान्वयधीसंभवात् न निषेधवपपद्यत इत्यर्थः। कथं तर्हीति। यदि विध्यर्थे ब
लवदनिष्टाननुबन्धित्वं विशेषणं कथं तर्हीत्यर्थः। श्येनेनेति॥ कर्मनामधेयं। तत्प्रख्यशास्त्रात्॥ श्येनसादृश्यादित्यर्थः। यथावै
श्येनो निपात्यादत्ते एवमयं द्विषंतं भ्रातृव्यं निपात्यादत्त इति श्येनसादृश्यप्रतिपादनात्। ततीयाच शब्दसाधुता
र्थिका। अभिचरन्निति। बलवदनिष्टं कामयमान इत्यर्थः। तथा च श्येननामको यागः बलवदनिष्टाननुबंधि शत्रुवधरूपेष्टसाध
नत्वे सति कृतिसाध्य इत्यन्वयबोधः विधिप्रवृत्तिः। विधिप्रयोगः विधेः सकाशात्। प्रवर्त्तितैः। श्येनो न स्वरूपतः निषिद्धः॥
वेदबोधितत्वात् किंतु फलतः इति मतेन समाधत्ते श्येनो हीति॥ आस्तिकानां॥ वैदिकशिष्टानां। श्येनस्य हिंसात्वेन नरकजनकत्वात्
स्वरूपत एव निषिद्धत्वमित्यभिप्रायेण शंकते नन्विति। तत्कर्तुः कूपादिकर्तुः। तत्र कूपादि। तत्रापत्तेः हिंसात्वापत्तेः। अदृष्ट
द्वारकेति। मरणोद्देशेनानुष्ठीयमानत्वे सति अदृष्टद्वारकमरणानुकूलव्यापारो हिंसेति विवक्षितमित्यर्थः। तर्हि कथमिति॥
श्येनस्यादृष्टद्वारकमरणानुकूलव्यापारत्वात् हिंसात्वमित्यर्थः। अजनैयायिकमतदूषणाय नव्यमतमुपन्यस्यति नव्या
स्त्विति। हेतुत्वं। प्रवृत्तिहेतुत्वं। अस्त्विति। विनिगमनाविरहात् त्रिविधेनापि रूपेणाहेतुत्वमस्त्वित्यर्थः। कार्यताज्ञानत्वादिनेति। आदि
पदादिष्टसाधनताज्ञानत्वं बलवदनिष्टाननुबंधित्वज्ञानत्वयोः संग्रहः। लाघवादिति। कार्यकारणभावत्रयस्य तुल्यत्वेपि कारण
तावच्छेदकलाघवादित्यर्थः। यद्यपि कारणतावच्छेदकलाघवं तथापि कार्यकारणभावत्रयकल्पनागौरवादाह वस्तुतस्त्विति॥
कृतिसाध्यताधीत्वेनैवेति॥ चिकीर्षाद्वारा प्रवर्तक कृतिरत्र प्रवृत्तिरूपा ग्राह्या॥ नातो जीवनयोनियत्नसाध्यप्राणवायुसंचारेऽप्रवृत्तिः

न्या॰ मं॰ चिकीर्षाप्रतीतिः। चिकीर्षाद्वारा प्रवृत्तिं प्रतीत्यर्थः। तद्धेतुत्वस्यैव प्रक्रान्तत्वात्॥ ननु सन्नो धात्वर्थगोचरेच्छा वाचित्वात् कृतिगोचरेच्छे
व चिकीर्षा तच्च न कृतिसाध्यताज्ञानहेतुः। कृतौ कृतिसाध्यत्वस्य बाधात्॥ पाकादिक्रियागतकृतिसाध्यत्वज्ञानस्य च भिन्नविषयक
४१ त्वात्॥ ज्ञानेच्छयोः समानविशेष्यकत्वेनैव हेतुहेतुमद्भावादिति चेन्न। पाकं कृत्या साधयामीति। चिकीर्षायाः प्रसिद्धत्वात् कृतिसाध्यत्वप्रका
रकपाकादीच्छाया एव चिकीर्षापदार्थत्वात्॥ तादृशचिकीर्षायां च कृतिसाध्यत्वप्रकारकज्ञानस्यैव हेतुत्वौचित्यात्॥ समानविशेष्य
कत्वात् समानप्रकारकत्वाच्चेति दिक्॥ नन्विष्टसाधनताज्ञानादेरुपायेच्छामोन्यप्रतिहेतुत्वे पौदिचिकीर्षां प्रत्यपि हेतुत्वे। सामा का५
न्यस्य यावद्विशेषानतिरिक्तत्वादित्यस्वरसादाह बलवदनिष्टेति प्रतिबंधकमिति॥ मउलीकरणादि चिकीर्षायां प्रतिबंधकमित्य
र्थः। तथा च तत्र कृतिसाध्यताधीसत्त्वेऽपि न चिकीर्षेति भावः। नन्विष्टसाधनताज्ञानस्य चिकीर्षां प्रति हेतुत्वपक्षे तृप्तस्यापि पाका
नी दौ चिकीर्षा स्यात्॥ तदानीमपि तत्र चेत्सिरूपेष्टसाधनताज्ञानसत्त्वादित्यत आह इष्टसाधनत्वं चेति॥ स्वरूपसदिति। वास्तवमि
त्यर्थः। तथा च वस्तुगत्या विद्यमानेच्छाविषयीभूतं यत्सुखादि तत्साधनताज्ञानमुपायचिकीर्षायां कारणमित्यर्थः। एवं चावि
द्यमानेच्छाविषयसाधनताज्ञानस्य हेतुत्वे चेत्यर्थः। पाकादाविच्छेति। इष्टं च न तस्य न पाकादौ चिकीर्षा तदानीं तर्हि साधनताज्ञा
तै नसत्त्वेऽपि तदा विद्यमानेच्छाविषयत्वाभावादिति भावः। इष्टसाधनत्वादित्रयस्य प्रत्येकप्रवर्त्तकज्ञानविषयत्वे वेदविध्यर्थतापि प्र
त्येकमेवोत्पाह विध्यर्थोपीति। बाधादिति। श्येनस्य हिंसात्वेन नरकजनकत्वादित्यर्थः। इष्टं च श्येनस्य रूपत एव निषिद्धत्वमिति मतेन॥ ४१
च बाधादिति। योग्यत्वादित्यर्थः॥ आचार्यास्तु बलवदनिष्टाननुबंधीष्टसाधनताज्ञानं प्रवर्त्तकमेव विध्यर्थस्त्वाप्ताभिप्रायचिकी
र्षारूपः भोजनं कुर्याः न पाकं कुर्यामिति मध्यमोत्तमे लिङा माज्ञाध्येषणारूपेच्छाप्रतीतेः। कुर्यामिति लिङा परेच्छेदेनैवेच्छावाचित्वक
तेर ल्पनात्॥ तच्च धात्वर्थविषयत्वेनान्वेति। तथा च यजेत स्वर्गकाम इत्यादौ यागः स्वर्गकाममत्कृतिसाध्यतयाप्तेच्छाविषय इत्यन्वय
बोधः। न कलंजं भक्षयेदित्यादौ तु कलंजभक्षणं मत्कृतिसाध्यतयाप्तेच्छाविषयताभाववदित्यन्वयबोधः। नतरिष्टसाधनत्वादि

कमुपायस्य प्रवृत्तिनिवृत्ती। तथा हि। यागो मदिष्टसाधनो मत्कृतिसाध्यतयाप्तेच्छाविषयत्वात्। मत्कृतिसाध्यतया पितुरिच्छाविषयमद
ध्ययनवत्। एवं कलंजभक्षणं बलवदनिष्टाननुबंधि मत्कृतिसाध्यतयाप्तेच्छाविषयताभावात्॥ मत्कृतिसाध्यतया पित्रानिष्य जा२
माणपारदार्यवदिति। स चाप्तो लौकिकविधावनियतः। वैदिकविधौ तु परमेश्वर एव॥ निखिलवेदस्य तत्कर्तृकत्वात्॥ यस्तु वेदपौ
रुषेयत्वं नाभ्युपैति तं प्रति विधिरेव वक्ता वक्रर्भः। कृतिकुमार्याः पुंयोगे मानमिलाकुः॥ न हि ते विधिं विभजते सोयमिति॥ स्तोकं तत्रैव वि
धेयमदृकारिकासंमतयतिमद्भुकमिति॥ एतस्यार्थः। प्रमाणांतरानवगतार्थज्ञापको विधिरपूर्वविधिरित्यर्थः। यागाद्व्रीहिप्रो
क्षणस्य प्रमाणांतरानवगतस्य ज्ञापकत्वं व्रीहीन्प्रोक्षतीत्यस्यास्त्येवेति लक्षणसमन्वयः। पक्षे प्राप्तस्य प्रापको विधिर्नियमविधिः॥
व्रीहीनवहंतीत्यत्र लक्षणसमन्वयश्च स्फुटः॥ अनेन विधिनाऽवघातस्य वैतुष्यार्थं न प्रतिपाद्यते प्रत्यक्षसिद्धत्वात्॥ किंतु तस्य नि
यमः। स च वैतुष्यार्थं व्रीहिष्ववघातमेव कुर्यान्नखविदलनादीत्येवंरूपः। तथा च नखविदलनपक्षेऽप्राप्तस्यावघातस्य
प्रापकत्वान्नियमविधिरिति॥ उभयस्य युगपत्प्राप्तावितरव्यावृत्तिपरो विधिः परिसंख्या॥ पंच पंचनखा भक्ष्या इत्युदाह
रणे लक्षणसमन्वयश्च स्फुटः। इदं हि वाक्यं न पंचविधपंचनखभक्षणपरं। तस्य रागतः प्राप्तत्वात्॥ नापि तद्भक्षणनियमपरं॥
द्विविधपंचनखभक्षणस्य युगपद्रागतः प्राप्तस्य च पक्षेऽप्राप्त्यभावात्। तस्मादिदं पंचेतरपंचनखानां श्वादीनां भक्षण
निवृत्तिपरमेवेति भवति परिसंख्याविधिरिति॥ एषा च दोषत्रयवती। श्रुतहानिरश्रुतकल्पना प्राप्तबाधश्चेति दोषत्रयं॥
श्रुतस्य पंच पंचनखभक्षणस्य हानात्॥ अश्रुतायाः पंचेतरपंचनखभक्षणनिवृत्तेश्च कल्पनात्॥ रागतः प्राप्तस्य पंचेतरपंचनख
भक्षणस्य बाधनाच्चेति॥ एवं प्रकारांतरेण विधिविभागो विज्ञेयो विस्तरभयान्नोक्तः। प्रोच्यते॥ विधिश्चतुर्विधः। उत्पत्तिविधिर्विनि
योगविधिः प्रयोगविधिरधिकारविधिश्चेति॥ तत्र कर्मस्वरूपबोधको विधिरुत्पत्तिविधिः। तत्स्वरूपं हि द्विविधं द्रव्यं देवता चेति॥
यथा दर्शपौर्णमासेनाग्नेयोऽष्टाकपालोऽमावास्यायां पौर्णमास्यां चेत्यादि॥ ज्योतिष्टोमेन सोमेन यजेतेति॥ अथ सोमपदं मत्वर्थ

न्या॰ मं॰ न्नरूपया सोमविशिष्टयागस्य विधिः। अन्यथा सोमयागयोरुभयोर्विधाने वाक्यभेदापत्तेः। क्वचिद्रूपाश्रवणेपि तु सन्निविधित्वं। य
थाग्निहोत्रं जुहोतीत्यादौ॥ अन्यथा दध्ना जुहोतीत्यस्य सोमेनेतिवदुत्पत्तिविधित्वे तत्र कुत्स्यानर्थक्यापत्तेः। अग्निहोत्रहोमस्य दध्नेति
वाक्येन चप्राप्तत्वात्॥ इष्टं चाग्निहोत्रं जुहोतीति विधिप्राप्तहोमे दध्ना काङ्क्षायां दध्ना जुहोतीति विधिप्रवृत्ते रुभयोरपि सार्थक्यमिति।
१२ एवं च कुक्षियागे उद्भिदा यजेत पशुकाम इत्यधिकारविधेरेवोत्पत्तिविधित्वं। स्वतन्त्रोत्पत्तिविधेरभावादिति॥ प्रधानस्याङ्गसंबंध
बोधको विधिर्विनियोगविधिः। यथा दध्ना जुहोतीत्यादिः। उत्पत्तिविधिप्रतिपादिताग्निहोत्रहोमे दध्ना काङ्क्षायां मन्त्रेनाविधि ग्निहो
वाक्येन दधिसंबंधः प्रतिपाद्यते॥ अनुष्ठीयमानपदार्थानां क्रमबोधको विधिः प्रयोगविधिः॥ क्रमोऽव्यवहितत्वोर्ध्वपर्यं॥
स्यांगविध्युक्तवाक्यतापन्नः प्रधानविधिरेव। यतो हि येन क्रमेण वाक्ये पठितानि तेनैव क्रमेण पदार्थानामनुष्ठानं। यथा
वेदं कृत्वा वेदिं करोतीत्यादौ॥ क्वचित्पाठक्रमं परित्यज्य प्रयोजनवशादर्थक्रमश्चाश्रीयते॥ यथाग्निहोत्रं जुहोति यवागूं प
चतीत्यादौ॥ अत्र हि पाठक्रमेणाग्निहोत्रहोमानन्तरं यवागूपाक इति लभ्यते॥ तदानीं तस्याः कस्मादर्थतापत्तिः॥ अर्थक्रमे
ण्यहितत्वाकानंतरमग्निहोत्रहोम इति लभ्यते तदा तस्याः कस्मादर्थक्यं॥ संभवतीत्यर्थक्रमेण॥ इष्टार्थत्वं स्यादस्यास्तात्
अत एव पाठक्रमादर्थक्रमो बलीयानिति॥ कर्मजन्यफलसंबंधबोधको विधिरधिकारविधिः। यथा यजेत स्वर्गकाम इत्या १२
दिरिति समासः। यागादौ विधिनेष्टसाधनत्वे बोधमाने तज्ज्ञानं विना हि नो यागस्य न संभवतीत्यतो यागजन्यमपूर्वं द्वारत्वे
न कल्प्यत इति नैयायिकसिद्धान्तं व्यवस्थापयितुं विधिशक्तेर्व्यापारत्वमुपपादयितुमनुविधिजन्यं वा कार्यबोधानन्तरं कल्प्य
त इति गुरुमतं पूर्वपक्षत्वेन दर्शयति अन्ये तु इति॥ विध्यर्थविचारे इत्यर्थः॥ नन्वेवमिति॥ यागस्य स्वर्गसाधनत्वं विधिना बो
धयितुं शक्यमिति नन्वेत्यर्थः॥ स्वर्गकामकार्यत्वस्येति॥ यागः स्वर्गकामकार्य इति बोधयितुमशक्यत्वादित्यर्थः। अत्र
का लक्षणमेव विवृणोति तथाहीति॥ काम्यसाधनत्वस्य। स्वर्गसाधनत्वस्य पक्षस्य मतमुपसंहरति तस्मादिति॥ कार्यं कार्यत्ववि

विशिष्टकार्यत्वारोपाद्यागत्वक्वार्यत्वेताश्रयाश्रयीभावेनान्वयस्यासंभवादाहतस्मिन्नेवेति। विषयतयेति। नियामकतयेत्यर्थः। त
दुक्तं। विशेषेण विशेषायोस्मिन्नो निर्बंधवाचकः। विशेषेण सिनोतीति विषयो नियामक इति। अन्वाहरेवं। कार्यसामान्ये एवेति।
तस्य प्रत्यक्षादिभिरुपस्थितत्वादिति भावः। ननु कार्यसामान्ये विधिशक्तावपूर्वस्य वाक्यार्थबोधेनान्वयासंभवादाह योग्यतेति
स्वज्ञानादेरपीति। यागप्रत्यक्षादेरपि कार्यविषयककार्यस्य संभवादित्यर्थः। काम्यइति। यजेत स्वर्गकाम इत्यादावित्यर्थः। तत्र नियोज्य
नियोजकभावलक्षणान्वयेनेत्यनु। ननु काम्यादन्यस्यापि काम्यसाधनत्वेन काम्यविषयस्य मेउद्धीकरणादेः नियोजकत्वं चेति। अन्वयेन क
रेण नियोज्यत्वसमुच्चयः। तत्र स्वर्गकामस्य ममेदं कार्यमिति बोधवत्त्वमिति॥ अन्वयेन नियोज्यनियोजकभावलक्षणान्वये च। ननु
काम्यादन्यस्यापि काम्यसाधनत्वेन काम्यविषयस्य मेउद्धीकरणादेः कार्यत्वात् तत्र स्वेवेति कथं काम्यसाधनत्वं प्रकृते। न्वयप्र
योजकरूपमिति तज्ज्ञानं च काम्येति। स्वज्ञानादेरपि संभवादित्युक्तं दृष्यतीति न च ज्ञानमिति। अत इति। यागविषयककार्यस्य
कामसाधनस्याश्रयादन्यस्यासंभवादित्यर्थः। योग्यतावलादित्यर्थः। अन्वयप्रयोजककाम्यसाधनत्वबलादित्यर्थः। स्वर्ग
विषयककार्यमित्यादि। अत्रोभयत्र यागविषयकत्वं यागनियम्यत्वं परं तु प्रथमे बोधो नियोजकत्वसंबंधेन स्वर्गकामप्रकारक
कार्यविशेष्यकः। द्वितीयबोधस्तु नियोजकत्वसंबंधेन कार्यप्रकारकः स्वर्गकामविशेष्यक इति। उभयत्राप्येवं नियोज्यनि
योजकभावलक्षणान्वयस्य संभवेन विनिगमनाविरहात्प्रकारद्वयमुक्तं। अत्र चैवं गुरुमतनिष्कर्षः स्वर्गकामो यजेतेति वा
क्यात् यागविषयककार्यं स्वर्गकामीयमिति प्रथमो बोधः। तदनन्तरं प्रथमबोधस्य सामग्रीवशाद्गुणत्वस्य मदंशविषयकस्य प्रवृ
त्तिकत्वेनोपपद्यत इत्यनुपपत्तिसहकृतेन शाब्देन पुनरपूर्वकार्यबोधः। स्वर्गकामस्य ममयागविषयकं कार्यमित्युपादानिष्कोवि
तीयः। एवमपूर्वकार्यताबोधद्वये जातेपि प्रवृत्तिर्नोपपद्यते। अपूर्वस्यालौकिकस्य प्रवृत्त्यविषयत्वात्। न चापूर्वकार्यताज्ञा
नाद्यागे प्रवृत्तिरिति वाच्यं प्रवृत्तिरिति वाच्यो। प्रवृत्तिकार्यताज्ञानयोः समानविषयकत्वेनैव कार्यकारणभावात्। तथा च या

न्या·मं·

यागप्रवृत्तेर्थ्यागविषयककार्यताज्ञानमवश्यमनुपेक्षं तच्चकामीकाम्यादर्शने काम्यसाधनत्वेनाख्याते कार्यतयानावैतीति नियमा
त्कामसाधनताज्ञानं विना न संभवतीत्युपस्थितादृद्धारा स्वर्गसाधनत्वेन प्रतीयते कार्यताबोधः काम्यस्य साधनं यागः स्व
र्गकामकार्य इत्यौपादानिकस्तृतीयस्तेनैव रागद्धेनापूर्वकार्यताबोधद्वयस्य पूर्वं तर्कस्यात्पपत्तिसहायेन जन्यते॥ अयमेवाधि
१३ कारित्वबोधः॥ यागविषयककृतिजनकस्वर्गकामनावत्त्वरूपस्याधिकारित्वस्यानुमानात्॥ ततो यागकृतिः कर्तारं विनानुप
पन्नेति अनुपपत्तिज्ञानसहकृतेन शाब्देन स्वर्गकामो यागकर्तेत्यौपादानिकश्चतुर्थः कर्तृबोधो जन्यते। एवमपि यागे प्रवृत्ति
र्यागिनोपपद्यते मदंशाज्ञानादित्यनुपपत्तिसहकृतेन शाब्देन स्वर्गकामस्य यागः कार्यो हमपि स्वर्गकाममपि ममापि यागः
कार्य इति पंचमो बोधो जन्यत इति॥ पंचमो बोध आनुमितिको मानसो वेत्यन्ये॥ अपरे तु अपूर्वकार्यताज्ञानं वृथैव यागप्रवृत्ति
हेतुः नन्वघटकार्यताज्ञानात्त्वरप्रवृत्त्यापत्तिः॥ समानविषयत्वाभावाच्च॥ प्रकृते चापूर्वकार्यताबोधे यागस्यापि भानेन समान
विषयत्वसत्त्वादित्याहुः॥ तच्च सकृदुच्चरितशब्दो नएकान्वयबोधजननानंतरं निराकांक्षतया कथं नानाबोधजननमिति वाच्यं॥
प्रवृत्तिपरं वाक्यं सहकारिसत्त्वबोधजननपर्यंतं साकांक्षमित्यभ्युपगमेन तत्तत्संभवादिति दिक्॥ योग्यतया॥ बाधाभावेन॥ आलंब १३
ते। विषयीकरोति॥ नन्वेवमहरहः संध्यामुपासीतेत्यादावप्यपूर्वविधिवाच्यं स्यात्। न चेष्टापत्तिः॥ तत्र फलाभावेनापूर्वस्यव्य
र्थता दत आह एवं चेति॥ विधिजन्यवाक्यार्थबोधस्यापूर्वविषयकत्वे चेत्यर्थः॥ अपूर्वमिति। पंडापूर्वमित्यर्थः। कार्यत्वलक्ष
णेति। तथा च ओदनः पचेदित्यत्र ओदनकामः कार्यः पाकः स्यान्वयबोध इति भावः॥ अपूर्वपक्षं दूषयति अन्यो श्रुतइत्यादिना॥ ला
घवादिति। धर्मिणि शक्तिकल्पनेन लाघवादित्यर्थः॥ गौरवादिति। धर्मधर्मिणोः शक्तिकल्पने गौरवादित्यर्थः॥ सेकांग्न्वेति। सेकम
सं नुत्पाद्य विनष्टत्वेपीत्यर्थः॥ उक्तमिति। नवं दर्शकपमित्यादिना पूर्वपक्षे उक्तमित्यर्थः॥ साक्षात्परंपरातामिति॥ द्वारनिरपेक्षका
रणत्वं साक्षात्कारणत्वं। द्वारसापेक्षकारणत्वं परंपराकारणत्वमित्यर्थः॥ साधनतासामान्यस्येति। अनन्यथासिद्धनियततर

वंरवृत्तित्वमेत्यर्थः॥ विशेषधर्मं विहाय सामान्यधर्मेणान्वप्रकारकबोधे क्वचिद्दृष्टान्तमाह यथा रूपवानिति। ननु रूपवांश्चैत्रवद्
त्वनीलत्वादेः कस्यापि विशेषस्य बाधाभावादेकरूपसामान्यज्ञानं प्रकृते तु साक्षात्साधनत्वबाधे साधनतासामान्यज्ञा
नं न संभवतीत्यभिप्रायवानाशंकते। अथेति। छिद्रेतरत्वेनेति। जलकर्मकाहरणसाधनीभूतघटे सछिद्रत्वरूपविशेषबा
धस्य सत्त्वात् छिद्रेतरत्वेन घटज्ञानमित्यर्थः॥ अत इति। एकविशेषे बाधे शाब्दसामान्यज्ञानं तदितरविशेषप्रकारकमि
ति नियमादित्यर्थः॥ अत्र प्रकृते स्वर्गकामो यजेतेत्यादौ॥ तु सछिद्रघटेत्वजलमाहरेत्यादौ संभव एव तत्क्षणयोमानमित्यर्थः।
अनुपकृते स्वर्गकल्पांतरमाह अस्त्वोवेति॥ साक्षादनुत्पन्नेनेति॥ तथा च स्वर्गस्य साक्षात्साधनान्यसाधनयागस्यासाका
रको बोध इति भावः॥ इहायागे तथाज्ञानं कथमसमयपद्यते व्याप्तिर्व्यापारजनकत्वज्ञाने॥ व्यापारानुपस्थितौ दराज्ञानेन संभव ता
त्तीत्यर्थः॥ अपूर्वस्य विधिवाच्यतानैयायिकानां आन्विति॥ पृथ्वीरास्तु विनाशिसनकालांतरभाविफलजनकं तन्न स्फलकालावच्छि
न्नव्यापारकमिति सामान्यव्याप्तौ स्मृतिजनकस्वानुभवभावनाव्यापारको दृष्टांतरेति स्वप्रलपहृजनकज्ञानादौ व्यभिचारवा
रणाय कालांतरभावितिफलविशेषं॥ स्वानधिकरणकालवृत्तिमित्यर्थः॥ तथा च प्रथमे यागे स्वर्गरूपेष्टसाधनत्वबोधस्त
त एतत्सामान्यव्याप्तिबलादपूर्वसिद्धिः॥ अन्यथा विधिबोधितस्वर्गसाधनत्वानुपपत्तिरिति नैयायिकसिद्धांतः॥ स्वोक्ते
आचार्यसिद्धं भकमाह तत्तुक्तमिति। कर्मकार्यं जनित्वाय। व्यापारं ननु यागध्वंस एव व्यापारोस्तु। किमपूर्वेण॥ नच
यागस्य कारणीभूतस्य ध्वंसस्वरूपाभावप्रतियोगित्वात् स्वर्गप्रतिबंधकत्वात्॥ न च ध्वंसस्यानंतत्वात् फलानंत्यापत्तिरि
ति वाच्यं॥ अपूर्वस्यापि कारेपि फलजनने समयविशेषस्य सहकारित्वमवश्यं वाच्यं॥ अन्यथा अपूर्वोत्पत्तिद्वितीयक्षणेपि
प३ रपि फलोत्पत्त्यापत्तेः। तथा च ध्वंसस्यानंतत्वेपि समयविशेषस्य सहकारित्वात्तस्य कादाचित्कत्वात् न फलानंत्यमिति
प्रायादिति केचन॥ अपूर्वस्वीकारधर्मसिरतिको नैनादिस्याद्दिस्तत्तनुपपत्तेः। नहि कीर्तनेन धर्मपरा। तिलपं यागादि

४ तोष तरितिवाच्ये कारणीभूतानां तासावप्रतियोगित्वेन एव प्रतिबंधक ४

प्री

न्या॰मं॰ तथापि ध्वंसं वा नाशयति। यागादेश्चिरविनष्टत्वात्। ध्वंसस्य चानंतत्वात्॥ अस्मन्मते तु यागादेश्चिरविनष्टेऽपि तथा
पारस्यापूर्वस्य कीर्तनादिना नाशात् स्वर्गानुपपत्तेरिति दिक्॥ प्रत्यक्षविरोधादिति। ज्ञानादीनां तृतीयस्य फलादावुपयोगत्वेऽपि योग्य
१४ प्रतियोगिकाभावस्यायोग्यत्वादिहानौ। नयजेयमिति यागाभावविषयकं लौकिकप्रत्यक्षं तस्मादित्यर्थः॥ विधिविरूपार्थवा
दं निरूपयति विधिभिन्न इति॥ विधिभिन्नः शब्दोऽर्थवाद इत्यर्थः। तेन घुटादौ नातिव्याप्तिरिति। तं त्रेधा विभजते स्तुति
ति॥ स्वोक्तत्रैविध्ये भट्टकारिकां संमतयति॥ विरोधेति॥ प्रत्यक्षादिविरोधे सत्यर्थवादो गुणवाद इत्यर्थः। यथा यजमानः
प्रस्तरः। आदित्यो यूप इत्यादि॥ अत्र प्रस्तरादेर्यजमानादेर्भेदस्य प्रत्यक्षे विरुद्धत्वात्तत्र गौण्या वृत्त्या प्राशस्त्यं बोध्यते। स च
यजमानकार्यकारित्वमादित्यवदुज्ज्वलत्वं चेति। अवधारितइति। प्रत्यक्षादिना निश्चितार्थप्रतिपादकोऽर्थवादोऽनुवाद
इत्यर्थः। यथा वायुर्वै क्षेपिष्ठा देवता॥ अग्निर्हिमस्य भेषजमित्यादिः॥ क्षेपिष्ठा शीघ्रगामिनी भेषजं। विरोधितद्धाना
दिति॥ मानांतरविरोधतत्प्राप्तिविरहार्थप्रतिपादकोऽर्थवादो भूतार्थवाद इति निर्गलितोऽर्थः। यथा प्रजापतिर्वपामुद या
स्मुपानयत्। इंद्रो वृत्राय वज्रमुदयच्छदित्यादि॥ अत्र विधांतरं स्पष्टत्वादुपेक्षितं। तत्रेदं अर्थवादो द्विविधः स्तुत्यर्थवा १४
दो निंदार्थवादश्चेति। विधेयस्य स्तावकोवा कांस्कतत्यर्थवादः। यथा वायव्यं श्वेतमालभेत भूतिकामः स्तत्र वायुर्वै क्षेपिष्ठा
देवतेत्यादिः। निषेध्यनिंदापरंवा अनिंदार्थवादः। यथा बर्हिषि रजतं न देयमिति तत्र सोरोदीद्यदरोदीत्तद्रुद्रस्य रुद्रत्वमि
ति। एतस्य निषेध्यरजतनिंदापरत्वादिति सर्वं सुस्थं। ननु शाब्दबोधाचारोऽपि प्रमाणभूतोऽस्ति तत्र रूपप्रदर्शयितुमयोग्यः कुप्यसुपेक्षितः।
नन्वस्य प्रमाणमेव न वेति वाच्यं। मंगलादावाचारात् प्रवृत्तत्त्वं प्रपन्नेः। न चेतस्य प्रवर्तकत्वेऽपि न प्रमाणत्वमिति वाच्यं। प्रव
त्तिविषयीभूतार्थज्ञानजननं विना प्रवर्तकत्वासंभवादिति चेन्न। आचारस्य स्वतंत्रप्रमाणत्वानभ्युपगमेऽपि वेदमू

लकत्वेनैव प्रमाणत्वाभ्युपगमात्॥ अन्यथा बौद्धाचारस्यापि प्रमाणतापत्तेः। न च शिष्टाचारत्वेनैव प्रामाण्यं ब्रूम इति वाच्यं॥ शिष्ट
त्वस्य वेदप्रामाण्याभ्युपगंतृरूपत्वे तत्र बौद्धाचारस्य वेदमूलकत्व एव पर्यवसानात्॥ न च तत्र तन्मूलकत्वमसिद्धमिति वाच्यं॥ मंगलाद्या
चारो वेदमूलकः। अलौकिकशिष्टाचारत्वाद्दर्शाद्याचारवदित्यनुमानात्तत्सिद्धेः। एवं मन्वादिस्मृतेरपि वेदमूलकत्वादेव प्रामाण्यं। अन्य
था शाक्यादिस्मृतेरपि प्रमाणतापत्तेः। न चात्र तन्मूलकत्वे मानाभावः। अष्टकाकर्तव्या इत्यादिस्मृतिर्वेदमूला अप्रत्यक्षार्थप्रतिपादकस्मृ
तित्वात्॥ प्रत्यक्षवेदमूलकस्मृतिवदित्यनुमानस्यैव मानत्वात्॥ अथौदुंबरीं सर्वां वेष्टयितव्येति स्मृतौ व्यभिचारः। न च तत्रापि तेनैव हेतुना वेद
मूलकत्वानुमानं॥ औदुंबरीं स्पृष्ट्वोद्गायेदिति प्रत्यक्षश्रुतिविरोधेन तदनुमानस्यासंभवात्॥ न हि सर्ववेष्टने स्पर्शः संभवति। तस्मा
त्सर्ववेष्टनस्मृतिर्लोभमूलेवेति सुदृढो व्यभिचार इति चेन्नैवं॥ अप्रत्यक्षार्थप्रतिपादकमहाजनपरिग्रहीतत्वस्यैव हेतुत्वात्॥
सर्ववेष्टनस्मृतेश्च सर्वत्राशेषमहाजनपरिग्रहीतत्वाभावेन दोषाभावात्॥ न्यायमूलकत्वस्मृतौ व्यभिचारवारणायाप्रत्यक्षार्थप्रतिपादकेति॥ न
च स्मृत्याचारयोर्मूलभूतो वेदः प्रत्यक्षेण बाधित इति वाच्यं॥ प्रत्युतानुमानादुच्छिन्नवेदमूलकत्वस्यैव सिद्धेः॥ नैव च निखिलवेदविहीनत्वा
स्मादिनां महाप्रलय उच्छेद इति वाच्यं॥ भारतवर्षेऽध्ययनाभावस्यैवोच्छेदपदार्थत्वात्॥ प्राभाकरास्तु स्मृत्याचारयोर्मूलभूतो वेदः। स छन्न
एवेत्याहुः॥ अत्र वेदत्वं न जातिः। चैत्रमैत्रीयादि ब्राह्मणत्वेन त्वत्क्षत्रियरजन्यतावच्छेदकजात्या सांकर्यात्॥ नाप्यदृष्टार्थप्रतिपादकवा
क्यत्वं। स्मृत्यादावतिव्याप्तेः॥ किंतु अदृष्टार्थप्रतिपादकत्वे सति नित्यसर्वज्ञप्रणीतवाक्यत्वं तत्॥ रामकृष्णादिप्रणीतलौ
किकवाक्ये अतिव्याप्तिवारणाय सत्यंतं। न च वेदस्यानित्यत्वादव्यापकत्वात्। पूर्वस्मात्केवेदत्वं जातिरेव तत्र सदस्मदादपात्मके तस्मिन्नत
देकदेशो वाक्यगुणसंबंधमात्रेण इत्यनुगतप्रत्ययात्॥ न चेदं निरुक्तोपाधिविषयकमिति वाच्यं। तस्याननुगतत्वात्। न तु दिदि
पपदार्थघटितत्वेन प्रत्यक्षासंभवात्॥ नन्वेतस्य जातित्वे तत्क्षत्रियरजन्यतावच्छेदकजात्या सांकर्यं प्रागुक्तमिति चेन्न॥ जातिसंक
रस्यादूषणत्वात्॥ अन्यथोपाधिसंकरस्यापि दुष्टत्वापत्तेः। न चैकत्र दंडित्वकुंडलित्वोपाधिद्वयवत् गोत्वाश्वत्वोभयमप्येकस्यां एकत्र
४ ननु तत्प्रणीतत्वमिति वाच्यं वेदानामनित्यत्वस्याग्रे साधनीयत्वेन तत्समुदायात्मकस्य वेदस्यानित्यत्वावश्यकत्वात् ४

न्या॰म॰ दितिवाच्यं॥ तदुभयस्यैकत्वेनाप्यप्रतीतेः॥ चेदत्ववारिरेजन्यतावच्छेदकजात्योः सामानाधिकरण्यप्रत्ययस्य च सार्वजनीनत्वात्॥ नच
फलत्वस्य तत्त्वोभयमपि जातिः स्यादिति वाच्यं। फलत्वस्य जातिसाधकाभावात्॥ किंपासमवायिकारणतावच्छेदकस्य मूर्त्तत्वस्य जाति
त्वेविष्टमेवेतिदिक्॥ एवं लिपिचेष्टयोरपि शाब्दस्मारकतया शाब्दानुमापकतया प्रमाणान्तरानुपयोगित्वेन न तु प्रमाणत्वं॥ तथाहि॥ विज्ञेहि
१५ ण लिप्यादिलक्षणकरादिचेष्टया च घटमानयेति शाब्दस्मरणं न तोऽर्थप्रत्ययः। यद्वाऽयं घटमानयेति शाब्दविषयकाभिप्रायवा
नयं घटमानयेति शाब्दव्यंजकलिपिकर्तृत्वात्। तादृशचेष्टाकर्तृत्वाच्च॥ यथाह मित्यनुमानात् घटमानयेति शाब्दानुमितिः।
ततोऽर्थप्रत्ययस्तिसर्वमवदातं। प्रसंगात्स्फोटं निरूपते व्यवस्थापयितुमाह सोयमिति। अन्यथानुपपत्त्या नित्यत्वे जये प्रसिद्धि
ज्ञा० रूपो ह्युभयः। तस्याः॥ उत्पत्त्यादिप्रतीतेः। व्यंजकेति। प्रयत्नेन नाभ्युत्थो रयतः पुंसो वायुर्नाभिस्थितः उरसि विस्तीर्णः कंठे वि २३
वृत्तो मूर्धानमाहत्य परावृत्तो वक्त्रे विचरन्नानाविधान् शब्दान् अभिव्यनक्तीति मीमांसकसिद्धांतः। नानाविधान् शब्दानु
निष्पादयतीति भ्रेयायकपाठः। तथा च गकारादिव्यंजकवायुसंयोगादिविषयकमेवोत्पन्नगकारइत्यादिप्रत्यक्षं गकारव्यंजकवायो
रुत्पन्नत्वाकारपरं तच्च न सोयमिति। प्रत्यभिज्ञाबाधकं। समानविषयताभावात्॥ नच वायोरतीन्द्रियत्वात् तदुत्पादादि १५
गोचरं प्रत्यक्षं न संभवतीति वाच्यं। वायोः स्पर्शनप्रत्यक्षत्वांगीकारात्। नन्च तथाप्यतीन्द्रियक्षणादिरूपकालघटितोत्प
त्तेरतीन्द्रियत्वात्कथं तत्प्रत्यक्षं। उत्पन्नप्रत्यासत्त्यनभ्युपगमेनोपनीतप्रत्यक्षस्याप्यसंभवादिति वाच्यं॥ काल
स्य षडिन्द्रियवेद्यत्वाभ्युपगमादितिभावः। असौ गकारगतत्वेनोत्पत्त्यादिप्रतीतिवत् अनयैव। उत्पादादिप्रतीतिवा॥ सा
प्रत्यभिज्ञा॥ गुरुमतदूषणायैव मतांतरमाह नन्वेतीति। उभयोरपि॥ प्रत्यभिज्ञानोत्पत्त्यादिप्रतीत्योरपि॥ इत्यपातिः॥ इत्यां दि३
कारपरत्वात्॥ उक्तदोषादिति॥ गुरुमतोक्तदोषापत्तेः दृग्मतमपि न संभवः। भट्टमते। स्वतंत्र दोषमाह शब्दस्येति बुद्धिरिति
येति॥ श्रोत्रग्राह्यत्वापरित्यर्थः। वैयाकरणमतमाहान्येत्विति॥ अनएव गुरुमतोक्तदोषादेव॥ स्फुटत्वे दोष
ते ते

माहदृष्टेति॥ स्फोटं साधयितुं शंकते नन्विति॥ नन्वुक्तपदप्रत्यक्षत्वे को दोष इत्यत आह तथा चेति॥ मिलितानां संभवादित्यु
क्तं तत्राह चेत्यर्थः॥ तदभावे। तस्मादिति॥ पदार्थप्रत्ययान्यथानुपपत्तितस्त्वर्थः। नन्वेवमुक्ततया वेत्याह। वरणान्तरेति॥
तदसंभवात्॥ तावद्वर्णाभिव्यक्तासंभवात्॥ तद्व्यंजकः स्फोटव्यंजकः स एव। तादृशचरमवर्णाभिव्यंजक एव॥ ननुपदार्थप्रत्यया
न्यथानुपपत्त्या मास्तु स्फोटाभ्युपगमः पदप्रतीत्यन्यथानुपपत्त्या तु स्यादित्याशंकते कथंचिदिति॥ तस्याः पदप्रतीतेः॥ ता
वद्वर्णोच्चरितत्वमात्रेण न पदप्रतीत्यनुपपत्तिरित्याशयेन शंकते नन्विति॥ न च तत्त्वस्य तदुपरतेः। आनुपूर्व्वीविशेषविशिष्ट
तावद्वर्णात्मकपदप्रत्यक्षस्य स्फोटं विनानवकल्पतीत्यर्थः। घोत्तरटत्वे हीति॥ घकारोत्तरोत्तरत्वेनाकारस्तदुत्तरटकारस्तदुत्त
राकारत्वं॥ अव्यवहितोत्तरत्वसंबंधेनैव घटत्वं तदुत्तरत्वं वा॥ घटपदे आनुपूर्वीशाब्दतावच्छेदकमित्यर्थः॥ यथा॥
तथोत्तरटत्वस्य घटशब्दावृत्तित्वात्॥ घटोऽयाग्निस्त्वापत्तेः॥ शाब्दतावच्छेदकप्रकारकपदज्ञानस्य पदार्थोपस्थापकत्वा
त्तेन च वासुदेवादिपदे वाच्यतावच्छेदकं स्यात् प्रकारकज्ञानादुपस्थितिसंभवात् दकारोत्तरवासुदेवस्य अत८
दिति कोशादिति वाच्यं॥ इष्टत्वात्। नच घटादिपदेऽपि प्रकारकज्ञानसत्त्वात् उपस्थितिः स्यादिति वाच्यं। तथा तात्पर्याभावा द्वि७
त्॥ यद्वा वासुदेवादिपदे वर्णान्तरसमभिव्याहृतत्वादस्तेनशाब्दतावच्छेदकं। त्वस्य शाब्दतावच्छेदकत्वा कोशेन६
धनादिति तत्त्वं। तस्माद्घोत्तरटत्वस्य॥ प्रत्यक्षस्य पूर्वपूर्ववर्णानुभवजनितसंस्कारसहकृतचरमवर्णसंबंधश्रोत्रेणजनितप्रत्यक्ष
तथा चानुपूर्वीविशेषविशिष्टपदस्य प्रत्यक्षेणोपपन्नत्वान्न तदर्थं स्फोटाभ्युपगम इति भावः॥ घोत्तरटत्वं प्रमाणाभिति॥ अथवा
वहितोत्तरत्वसंबंधहेतुघवत् मिति साकाराप्रतीतिर्बोध्या। बहार्थेव प्रमाणाभिति। व्यवस्थापयितुमर्थापत्तेः प्रमाणान्तरत्वे
नेराकरिष्यन्॥ पृथग्भिन्नं तस्यास्तत्स्वरूपकृतेनान्यथानुपपत्तिरपिति॥ अनुपपद्यमानमिति॥ अनुपपत्तिज्ञानेनेत्यर्थः। तत्र रात्रि
ज्ञानं। अत्र। रात्रिभोजनकर्त्त्वेनानुपस्थितेव्यतिरेकिवैव यद्दिरात्रिभोजनसिद्धिस्तदादिवा। भुंजानस्य पीनत्वान्यथानुपपत्त्या

न्या·मं· सन्निकर्षोजनेकल्प्यत इति व्यवहारेणस्मादित्यत आहार्यप्रत्यक्षं चेति। ज्ञानस्यानुव्यवसायानुपपत्त्या ... अनुप
गन्निपदं आतिरेकानुमानस्यैवानामोतरमित्यर्थः। तथा च स व्यवहारोप्यनुमानविषय एवेति भावः॥ पौराणिकाभिमतमैतिह्यं खंडयति अ
वेदितेति॥ अविदितमूलकर्तृकस्यर्थः। शब्दविशेषः। इह वटे यक्षः प्रवसतीत्यादिरूपः। मानं॥ प्रमितिजनकः। नो चेदिति। यदि सांप्रायिक
२६ स्तद्धा प्रमाणमेवनेत्यर्थः। प्रमाणनिरूपणानंतरमुपेक्षितसंगत्या ज्ञानगतप्रामाण्यं परीक्षितुमहं मतनाम्नि साक्षिपति ननु सर्वमिदमि
ति। सर्वप्रमाणनिरूपणमित्यर्थः। प्रमाणत्वासिद्धाविति। अयंभावः। प्रमाणत्वज्ञानार्थं हि अत्रोद्देशलक्षणाद्यात्मकं प्रमाणनिरूपणं॥
तथा चेतरभेदज्ञानात्मकं प्रमाणत्वज्ञानं प्रमाकरणत्वरूपलक्षणज्ञानादेव॥ तच्च प्रमात्वज्ञानाधीनं॥ प्रमापदस्य तत्र प्रविष्टत्वात्॥ प्रमात्व
ज्ञानं च प्रमात्वज्ञाने न विनानसंभवति॥ प्रमात्वस्य तद्वति तत्प्रकारकत्वात्॥ तच्च जातिरूपं तद्वति तत्प्रकारकानुभवत्वरूपं वास्तु उभयथापि तत्सिद्धि
रावश्यकीति सुष्ठूक्तं सर्वमिदं प्रमात्वसिद्धौ स्यादिति॥ तदेवं प्रमात्वमेव नानुप्रत्यक्षेणैव तत्सिद्धिरस्त्वित्यत आह नहीति॥ तत्त्व प्रमात्वं॥
अतीन्द्रियत्वादिति। ज्ञानस्यातीन्द्रियत्वात् तद्धर्मस्य तत्प्रमात्वस्य न प्रत्यक्षमित्यर्थः। गुणभिन्नेत्यातीन्द्रियधर्मिगतस्य धर्मस्यातीन्द्रियत्वनि
यमात्॥ ज्ञात्वादौ व्यभिचारवारणाय गुणभिन्नस्येति॥ धर्मविशेषणमिति भावः। अन्यथा ज्ञानस्यातीन्द्रियत्वाभावे॥ विषयतरसंचा
र॥ विषयांतरज्ञाने। अत्र सर्वपक्षितुरूणां समाधानमाहात्र गुरव इति॥ स्वप्रकाशमेवेति॥ यथा न्यायमते घटज्ञानं घटविषयकं
तद् घटप्रकाशकं। यथा चेश्वरज्ञानं स्वविषयकत्वात्स्वप्रकाशकमपि। अन्यथार्ष्वरज्ञानस्य सर्वविषयकत्वं न स्यात्। तथा गुरुमते २६
सर्वमेव ज्ञानं स्वविषयकत्वात्स्वप्रकाशकमेव ननु व्यवसायानुव्यवसायभेदकल्पने गौरवादित्यर्थः। तथा च ज्ञानस्य प्रत्यक्षत्व
पात्तत्कृतं प्रमात्वमपि प्रमात्वस्य प्रत्यक्षमेवेति भावः। स्वात्मानं। स्वस्वरूपं। अत एव। घटादित्रितयविषयकत्वादेव। इष्टे च।
सर्वस्यापि ज्ञानस्य घटमहं जानामीत्याकारत्वे च॥ मितिः। ज्ञानं। माता॥ प्रमाता। मेयो घटादिः। गुरुमतं दूषयति। तन्नेति। स्वात्म जीवात्मा २
नो रिति। स्वे ज्ञाने॥ आत्मा ज्ञानाश्रयः। अनयोरित्यर्थः। अत्रायमेव विवरणीति ... चाक्षुषादिज्ञान इति॥ नन्वेवं मुद्यमानमिति॥

ज्ञानमितिशेषः। सर्वमस्तीति। तथा चोत्पद्यमानचाक्षुषादिज्ञानस्य स्वं प्रति सर्ववृत्तित्वाभावान्न स्वात्मकस्वविषयकचाक्षुषादिहेतुत्व
मितिभावः। संनिकृष्टं चेति। अत्रापि सर्वमित्यनुषज्यते। अयमिमिनः संयुक्तसमवायस्य ज्ञानग्राहकस्य ज्ञानोत्पत्तेः सर्वमपि सत्त्वान्नहे
तुत्वानुपपत्तिस्तथापि विषयनिष्ठस्यैव तस्य हेतुत्वात् ज्ञानोत्पत्तेः प्राक् तस्य ज्ञानरूपविषयनिष्ठत्वं अत एवोक्तं संनिकृष्टं चेति न तु त
त्संनिकर्षो चेति॥ अन्यथा उक्तनरूपस्यान्यदस्य वस्तुपरिगले अत्रैव सर्वपक्षे भट्टसमाधानं दर्शयति भट्टास्त्विति॥ निगूढमिति॥ अ
तिप्र५ हंतस्मात् यथा घटज्ञानानंतरं घटो मया ज्ञात इति व्यवहारो न स्यात्तामिति भावः। तथैव। ज्ञाततयैव। अनुमेयमिति। अहं ज्ञानवा
न्ज्ञाततावत्त्वादित्याकारेण घटो ज्ञानविषयो ज्ञाततावत्त्वादित्याकारेण वा अनुमानेन ज्ञेयमित्यर्थः। निरस्तत्वादिति। प्रत्यक्षपरिच्छेद
इतिशेषः। ननु ज्ञाततया। परं ज्ञानांतरकल्पनाया निरस्तत्वेपि तज्ज्ञानापन्नविषयतयैव तदनुमेयमित्यत आह ज्ञानरूपस्येति। भट्टमते
ज्ञानस्यातीन्द्रियत्वेन ज्ञानरूपसाध्याप्रसिद्धावित्यर्थः। इदमापाततः निर्विकल्पकेतरज्ञानस्य मनोयोग्यत्वादित्यर्थः। एवं॥ ज्ञानस्य मनो
२८ ग्राह्यत्वे॥ ज्ञानप्रामाण्यस्य स्वतो ग्राह्यत्वं खंडयन्ने परतो ग्राह्यत्वं व्यवस्थापयितुं तदंशं प्रतिक्षिपति तथापीति॥ ज्ञानस्य मनोग्राह्यत्वेपि
त्यर्थः। तस्य ज्ञानस्य॥ अनुमानेनेति। ज्ञातमेजलज्ञानं प्रमाणं समर्थप्रवृत्तिजनकज्ञानजातीयज्ञानत्वात् संमतवदित्यनुमानेनेत्यर्थः
साध्याप्रसिद्धेः प्रमात्वरूपसाध्याप्रसिद्धेः। अत्र भट्टा इति प्रामाण्यं केन ग्रहस्तरस्यासेपे भट्टाः समादधते इत्यर्थः। ज्ञाततयेति। अयं घ
टो घटत्वप्रकारकज्ञानविशेष्यत्वानुमितिर्जायमाना घटत्वप्रकारकज्ञानविशेष्यकत्वरूपं ज्ञानप्रामाण्यमपि विषयीकरोति। तदनुमि
तौ घटे घटत्वप्रकारकज्ञानविशेष्यकत्वे भासमाने सति ज्ञानेपि घटत्वप्रकारकत्वं च घटत्वेन घटो ज्ञात इति प्रतीतिबलादास्थीयत इ
ति। केचित्तु। अहं घटत्वप्रकारकज्ञानवान् तादृशज्ञाततावत्त्वादित्याद्यनुमानमाहुस्तन्न॥ ज्ञाततायाजनकज्ञानविषयनिष्ठत्वेना
त्मवृत्तित्वाभावात्॥ न च स्वसंबंधविशेषणस्वजनकज्ञानसमवायित्वेन तस्या आत्मवृत्तित्वमिति वाच्यं॥ तथाप्यात्मनि समवायेन
घटत्वप्रकारज्ञानानुमितेरुत्पादेपि घटत्वप्रकारकघटविशेष्यकत्वस्य तदनुमितौ कथमप्यभानेन प्रामाण्यासिद्धेरिति॥ भट्टमतं दू
घटत्वप्रकारकघटविशेष्यकत्वंभासत एव तयोः समानवित्तिवेद्यत्वात् ज्ञाततया

न्या.सं. पर्येत्ति तन्नेति॥ ततः ज्ञानमात्रव्याप्यते गृहीत ज्ञाततायाः॥ अन्यथा। व्याप्यज्ञानांसाधुतावच्छेदकभिन्नरूपेणापि साध्यसिद्धे।
व्यभिचारादिति॥ रजतत्वभ्रमव्यावृत्तज्ञाततयैव प्रमात्वविशिष्टज्ञानमनुमेयं तत्र च न व्यभिचार इत्यरुचेर्दूषणांतरमाह साध्या
९७ प्रसिद्धेश्चेति प्रमात्वाप्रसिद्ध्या तद्विशिष्टज्ञानरूपसाध्याप्रसिद्धेरित्यर्थः॥ गुरुमतं दूषयितुमुपन्यस्यति गुरवस्त्विति। स्वप्रकाश
महिम्नेति॥ स्वप्रकाशज्ञानेन ज्ञायमानत्वयथा ज्ञानं सिद्ध्यति तथा तद्गतं प्रामाण्यमपि तत्प्रकारकत्वरूपं सिद्ध्यतीत्यर्थः। नवस्वप्रका
शकमहिम्नापि ज्ञानमात्रं सिध्येन्नतु तद्गतं प्रामाण्यं अन्यथा तद्गतगुणत्वसत्वादेरपि सिद्ध्यापत्तेरिति वाच्यं। घटमहं जानामीत्याकारक का
रकज्ञानेन घटत्वात्मत्वविशिष्टघटात्मनोरिव प्रमात्वविशिष्टस्यैव ज्ञानस्य विषयीकरणेन प्रमात्वस्यैव सिद्धिर्नतु गुणत्वादेरित्य
भिप्रायात्॥ तदुक्तं मतं दूषयति तन्नेति॥ असिद्धेरिति प्रामाण्याभावेन असिद्धेरित्यर्थः॥ नन्वनुव्यवसायाभेदकल्पनापागौर अनुव्यवसाय
वात्स्वप्रकाशत्वमुक्तेस्त्वरसादाह॥ किंचेति॥ एवं प्रामाण्यस्य प्रकाशत्वेन वेद्यत्वे॥ संशय इति॥ ज्ञानमेजलज्ञा
नं प्रमा वेति ज्ञानधर्मिकप्रामाण्यतदभावकोटिसंशयो न स्यादित्यर्थः॥ [illegible] एतदेवोपपादयति ज्ञानग्र ग्र
ह इति॥ स्वप्रकाशमहिम्ना ज्ञानग्रह इत्यर्थः॥ ननु यत्र प्रामाण्यसंशयस्तत्र ज्ञानग्रह एव नेष्यत इति॥ अत्राह स्वेति॥ ज्ञाना ९७
ग्रहे॥ ज्ञानस्य स्वविषयकत्वरूपस्वप्रकाशता बाधितत्वस्यादित्यर्थः॥ ननु संशयस्थले तस्याभ्युपगमप्रतिबंधात॥ ज्ञा
नस्य स्वप्रकाशत्वस्याभावेपि न तद्बाधः॥ असति प्रतिबंधके तत्स्वप्रकाशताया उपगमादित्यरुचेराह धर्मिज्ञानेति॥
संशयस्थले यदि ज्ञानाग्रहस्तदा धर्मिज्ञानाभावात्॥ प्रामाण्यसंशयो न स्यादित्यर्थः॥ ननु धर्मिज्ञानाभावेपि संशयोस्तु इत्यत आ
ह समानधर्मवत्तयेति॥ साधारणधर्मवत्तयेत्यर्थः॥ तथा च कारणं विना कार्योत्पत्तिः स्यात् धर्मिज्ञानं विना कथं प्रामाण्यसंशयः स्या
दिति भावः॥ न च धर्मिज्ञानहेतुधर्मीन्द्रियसन्निकर्ष एव संशयहेतुः॥ ननु धर्मिज्ञानं तद्धेतोरेव तदस्तु किं तेनेति न्यायादिति वाच्यं
तुरगादौ वेगेन गच्छतो नानाधर्मीन्द्रियसन्निकर्षेपि यस्यैव धर्मिणो ज्ञानं तत्रैव संभूतः। पर्यसो वेति संशयो नान्यत्र सत्वयम्

भू न

तिरेकाभ्यां सर्वत्रैव संशये तद्धेतुत्वादिति संप्रदायः॥ नन्वत्रैव धर्मिज्ञानविषयतानियामकेन जुतत्सादिना अवच्छेदकेनैव संशयनि
यमोपपत्तौ विद्यमानमपि धर्मिज्ञानमन्यथासिद्धमिति वाच्यं॥ यत्कोटिसहचरितरूपो धर्मवत्तया धर्मिज्ञाने तत्कोटौ शेतस्मिन्नु ता
धर्मिणि उत्कटकोटिकः॥ संशयः प्रायः पक्षतोपमितत्वप्रयुक्ते तत्स्ता द्रव्यासंशये एककोटि सहचरितरूपो धर्मवत्तया धर्मि
५८ ज्ञानस्य हेतुत्वं कल्प्यते तथा च यद्विशेषयोः कार्यकारणभावौ सति बाधके तत्सामान्ययोरपि सामान्यसंशयस्यच्छेदेन धर्मिज्ञा
नहेतुत्वकल्पनात्॥ तत्कोटावुत्कटत्वं च विशेष्यताविशेषः प्रकारतादिवदिति दिक्॥ मिश्रमतं दूषयितुमुपन्यस्यति मिश्रा इ
मिश्रास्त्विति॥ प्रथमेति॥ घटोयमिति व्यवसायानन्तरोत्पन्नेन घटमहं जानामीत्यनुव्यवसायेनैवेत्यर्थः॥ आद्यानुव्यवसा
यग्राह्यत्वमेवोपपादयति तथाहीति॥ व्यवसायोपनीतिः घटोयमिति व्यवसायेन मनसा सह सन्निधापितः ज्ञाने॥ व्यवसायरूपज्ञा
नेन। तद्वतः घटत्ववतः उपनयसहकारेण ज्ञानप्रत्यासत्तिसहकारेण॥ अन्यथा॥ उपनयसहकारेण विना मनसो बहिरर्थविषयकज्ञाना
जनकत्वचेति॥ कथं नोक्ताव्युत्पत्तिलब्धस्तत्तत्पदार्थज्ञानमित्यर्थः॥ तत्र मनोनिष्ठप्रमाणस्य व्यापाराभावादिति भावः। घट
त्ववद्विशेष्यकत्वस्यानुव्यवसाये ज्ञानेनुसाध्यघटत्वप्रकारकत्वस्यापि भानं नु सायति घटत्वमप्रीति॥ विशेष्यकताव
त। घटत्ववद्विशेष्यकतावृत्त॥ उभयस्य प्रामाण्यघटकद्वयस्य॥ एकत्र॥ व्यवसाये मिश्रमतं दूषयति तदपि नेति॥ एवं हि॥
मिश्रोक्तप्रकाराश्रयणे हि॥ न चेति॥ द्वैलक्षण्यमात्रग्रहे प्रामाण्यं गृहीतमिति नेत्यर्थः। तद्विद्विशेष्यकत्वविशिष्टमिति॥ त
द्विशेष्यकत्वसमानाधिकरणमित्यर्थः॥ गुणकर्मान्यत्वे सति सामान्यवान्॥ गुणत्वस्य त्रैवृतद्विशेष्यकत्वे सति तत्प्रकार
कत्वमित्रत्वेपि सामान्याधिकरण्यात्मकवैशिष्ट्यस्य सत्वात् सम्यग्दर्शनादिति भावः॥ वह्निर्गुंजापुंजयोरित्यादि वक्ष्यमाणस्व
रसोदाह। किं चेति॥ एतदपि तद्विशेष्यकत्वविशिष्टतत्प्रकारकत्वमपि गुंजावह्निरिति भ्रम इति॥ गुंजावह्निरितिस्य प्रका
रकत्वस्य हाले बुनत्वमेव वह्नित्ववद्विशेष्यकत्वस्य च न तु गुंजावह्निःत्वप्रकारकत्वस्य च गुंजाविशेष्यकत्वात्। एवं गुंजात्ववद्विशेष्य
तद्विशेष्यकत्वतत्प्रकारकत्वोभयस्य प्रामाण्यापाभावादिति भावः। किं तर्हि प्रामाण्यमित्यत आह किंचिदिति

न्या॰म॰ कत्वस्य गुंजायां रोगुंजात्वे प्रकारकत्वस्य वन्ह्यंशे सत्त्वात् व्याप्तिरिति समुदायार्थः। किंचित्त्वादि॥ तद्विशेष्यकत्वावच्छिन्नं तत्प्रकार
कत्वं प्रमात्वमित्यर्थः। न चेदं प्रागुक्तपक्षे॥ यत्र तत्र वन्हित्वप्रकारकत्वेन वन्हित्वद्विशेष्यकत्वावच्छिन्नं किंतु गुंजात्ववद्विशेषत्वा
१८ वच्छिन्नं॥ गुंजांशे एव वन्हित्वस्य प्रकारत्वेन भानात्॥ एवं गुंजात्वप्रकारकत्वमपि न गुंजात्ववद्विशेष्यकत्वावच्छिन्नं किंतु वन्हित्व
द्विशेष्यकत्वावच्छिन्नं॥ वन्ह्यंशे एव गुंजात्वस्य प्रकारत्वेन भानादिति॥ घटोयमित्यादि प्रमायां चास्त्येव॥ तत्र घटत्वप्रकारकत्वस्य
घटत्ववद्विशेष्यकत्वावच्छिन्नस्यैव सत्त्वात्॥ घटांशे एव घटत्वस्य प्रकारत्वेन भानात्॥ ननु वन्हिगुंजापुंजयोर्वन्ही इतिभ्रमेति
व्याप्तिस्तत्र वन्हित्वप्रकारकत्वस्य वन्हित्ववद्विशेष्यकत्वावच्छिन्नस्यापि सत्त्वादिति वाच्यं॥ तदंशे भ्रमस्य वन्ह्यंशे प्रमात्वस्योप
गमेन लक्ष्यतया तत्र व्याप्तेरदोषत्वात्॥ नन्द्वादिभिस्त्रिभिः स्वस्वमतानुसारेणोपपादितं ज्ञानप्रामाण्यस्य स्वतस्त्वं खंडयितुं ज्ञाने
यापकः स्वाभिमतप्रामाण्यस्य परतस्त्वसिद्धांतं प्रतिजानीते व्यत इति॥ द्वितीयेन त्विति। घटज्ञानानंतरं ज्ञानवानहमित्याकारेणे :संसर्ग
त्यर्थः॥ तद्विशेष्यकत्वस्येति॥ तत्प्रकारकत्वस्याप्युपलक्षकं। तथा च घटोयमिति व्यवसायोत्पत्तिनिश्चितयोर्घटत्वतद्वत्तासंसर्गतया
प्रकारकत्वविशेष्यकत्वयोः अनुव्यवसायेनोपस्थितत्वात्तयोर्मिथः। विच्छेद्यावच्छेदकभावस्य संसर्गतया भानसंभवात् कितो
प्रकारकत्वं घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्ववद्वितीयानुव्यवसायेन सुग्रहमिति निर्गलितार्थः। न चैवमिति। तत्र एवमित्यस्यैव विवरणं यस्मात्तु
विषयवत्तायामप्यत्तरतीति॥ निरुक्तप्रामाण्यस्य द्वितीयानुव्यवसायगम्यत्वे तत्रसक्तेः। दोषवशादिति। अनभ्यासदशोत्पन्नत्वादिरूपदोष १८
वशाद्यत्र ज्ञाने प्रामाण्यं द्वितीयानुव्यवसायेनैव गृहीतं तत्र प्रामाण्यसंशयसंभवादित्यर्थः। अन्यथा। दोषसत्त्वेपि निश्चायकसामग्र्या
निश्चयस्यैव जनने। तस्य पुरुषत्वस्य। प्रामाण्यस्य द्वितीयानुव्यवसायगम्यत्वे मिश्रमतप्रवेशापत्तेः शंकां निषेधति न चेति असत्त्वेति।
अत्रास्य ग्राह्यत्वे नाभिमतं प्रामाण्यं तदाश्रयस्य द्वितीयानुव्यवसाये न न्यायमतेपि प्रामाण्यग्रहात्स्वतस्त्वापत्तिरतो यावदिति स्वा
श्रयानुव्यवसायविशेषणं तदप्यशेषमात्रपरं। तेन यत्रांकुरादिविशेषज्ञानिय प्रामाण्ये स्वाश्रयानुव्यवसायग्राहक एव तत्र

नयावत्स्वाश्रयानुव्यवसायग्राह्यत्वस्य बाधः। घटोयमिति व्यवसायानंतरं बाधादिदोषकालोत्पन्नानुव्यवसाये न प्रामाण्यग्रहान्मि
श्रमतेपि स्वतस्त्वबाधापत्तिरित्यतो ऽसति प्रतिबंधक इति॥ तथा च प्रतिबंधकासत्त्वकालीनयावत्स्वाश्रयानुव्यवसायग्राह्यत्वं मिश्रम
ते प्रामाण्यस्य स्वतस्त्वमित्यर्थः। अत्र च ग्राह्यत्वं ग्रहणयोग्यत्वं। तेनानुव्यवसितज्ञानप्रामाण्ये न बाधः। तद्वदेति। मिश्राभिमतस्वतो
ग्राह्यत्वे चेनाभिमते। यावद्घटानुव्यवसायांतर्गतप्रथमानुव्यवसायेन प्रामाण्यग्रहानभ्युपगमादित्यर्थः। मुरारिमते च यावत्स्वाश्रयानु
मितिग्राह्यत्वमेव स्वतस्त्वं प्रामाण्ये। स्वप्रामाण्यं तदाश्रयस्य घटोयमित्यादिज्ञानस्यानुमितिज्ञाततालिंगकेवतद्ग्राह्यत्वे प्रामाण्यमा
त्रे घटो ज्ञाने विषयः ज्ञाततावत्त्वात् पटवदित्यनुमानेन पक्षधर्मताबलात् घटविशेष्यकघटत्वप्रकारकज्ञानविषयत्वानुमितिर्जा
यमाना ज्ञानेपि घटविशेष्यकघटत्वप्रकारकत्वरूपप्रामाण्यं विषयीकरोतीति नानुपपत्तिः। पदाअहे घटं जानामि घटज्ञानवानहं वा
दिस्वतुमानेन घटविशेष्यकघटत्वप्रकारकज्ञानसिद्धिः। गुरुमते च यावत्स्वाश्रयविषयकज्ञानग्राह्यत्वमेव तत्॥ स्वाश्रयविषयकं च
ज्ञानं तदेव घटमहं जानामीत्याकारकं स्वप्रकाशमिति। मतत्रयसाधारणस्वतस्त्वं च यावत्स्वाश्रयज्ञानग्राहकग्राह्यत्वं॥ स्वप्रामा
ण्यं तदाश्रयज्ञानस्य ग्राहकं तद्विषयकं तद्ग्राह्यत्वं तद्विषयत्वमित्यर्थः। यथाश्रुते वृत्ति घटत्वप्रकारकत्वरूपप्रामाण्याश्रयीभूत
घटज्ञानस्य ग्राहकं घटमहं जानामीत्याकारकं तच्च भट्टमते ज्ञाततालिंगकानुमितिरूपं। आत्मप्रत्यक्षानुमिते तस्यैवाकारात्स्वप
गमात्। गुरुमते च तदेव ज्ञानं तस्य स्वप्रकाशकत्वाभ्युपगमात्। मिश्रमते चानुव्यवसायरूपं घटोयमिति व्यवसायानंतरोत्प
न्नानुव्यवसायाभ्युपगमात्॥ तद्ग्राह्यत्वं च तत्प्रामाण्ये स्तीति नानुपपत्तिः। अत्र स्वाश्रयज्ञानग्राहकं द्वितीयानुव्यवसायादि
नान्यायमतेपि प्रामाण्यग्रहात्स्वतस्त्वापत्तिरतो यावदिति ग्राहकविशेषणमशेषपरमिति ग्राहकसाये। ग्राहकं च ज्ञानवि
तिपरजन्यज्ञानाभिन्नमेव ग्राह्यं जेन ज्ञानपरजन्यज्ञानेन प्रामाण्याश्रयज्ञानग्राहकेन प्रामाण्यस्याग्रहेपि न बाधः। ज्ञानपरं
च तत्प्रामाण्याश्रयघटे छाग्राहकेण प्रामाण्यस्याग्रहाद्बाधवारणाय। यदि च ज्ञाने छयोः प्रामाण्यं भिन्नाभिन्नमेव तदा नो

न्या॰मं॰

९९

पादेयमेव तदिति ध्येयं। ज्ञानगतप्रामाण्यस्यैव परैः स्वतस्त्वाभ्युपगमादिति स्वत्वं पक्षविशेषितेन। न्यायमते द्वितीयानुव्यवसायादिना प्रामाण्यग्रहादनेन
रं साध्यप्रसिद्धिमत्त्वात्तद्ग्राहकमनुमानमपि किञ्चित्संभवतीत्याह एवं चेति। द्वितीयानुव्यवसायादिग्राह्यत्वे चेत्यर्थः॥ तद्ग्राहकं। प्रामाण्यग्रा
हकं। अनुमानप्रयोगं दर्शयति तद्यथेति॥ प्रमा। पुरुषत्ववति पुरुषत्वप्रकारकं। करादिमतीति॥ करादिमद्विशेष्यकत्वे सति पुरुषत्व
प्रकारकज्ञानत्वादित्यर्थः। ननु हेतुज्ञानं कथं वृत्तमिति चाह अयं पुरुष इति व्यवसायानन्तरं तत्र करादिमत्त्वे सति पुरुषं जानामी
त्यनुव्यवसायेन करादिमद्विशेष्यकपुरुषत्वप्रकारज्ञानवत्त्वस्य व्यवसायनिष्ठस्य सुग्रहत्वात्। पुरुषत्ववति पुरुषत्वप्रकारकत्वमात्रं
न गृह्यते॥ अप्रेमंशयानुरोधात्॥ प्रागुक्तेश्चेति। चिन्तामणिकृन्मतं दर्शयति अन्ये त्विति॥ प्रथमं। प्रामाण्यरूपसाध्यसिद्धेः
सर्वे। व्यतिरेकिणेति॥ पुरुषोऽयमिति ज्ञानेन तद्रूपत्वाभाववति पुरुषत्वप्रकारकं करादिमति पुरुषत्वप्रकारकत्वात्। यदुक्तसाध्या ९९
भाववत् तद्धेतुकसाधनाभाववत्। यथास्थाणौ पुरुषत्वज्ञानमिति व्यतिरेकिणा साध्यमित्यर्थः। ननु साध्येति साध्यत्वाप्रामाण्या
भावस्यानुपलब्धिरित्यर्थः। ननु तदभाववति तत्प्रकारकत्वरूपाप्रामाण्याभावस्य घटादौ निश्चितत्वात्कथं साध्यप्रसिद्धिरित्याशङ्क्य
निरुक्ताप्रामाण्याभावस्य ज्ञानत्वविशिष्टस्य साध्यत्वात्। तस्य च पक्षातिरिक्ते कुत्राप्यसत्त्वादिति भावः। तस्येति। अप्रामाण्याभा
वरूपसाध्याभावस्याप्रामाण्यस्य तदभाववति तत्प्रकारकत्वरूपस्येत्यर्थः। एवं च साध्यप्रसिद्धिं विनापि साध्याभावव्यापकत्वमाव
यो व्याप्तिग्रहे व्यायव्यापकत्वयोत्यादि। वस्तुतस्तु साध्यस्याभावस्याभावस्य वा व्यापकत्वयापकत्वमावोगृहीतः पक्षे तद्धेतुनिश्चया
त्तस्य व्याप्यस्य प्रसिद्धेः प्रसिद्धो वाऽभावः साध्यात्मकः पक्षधर्मताबलात् सिद्ध्यतीत्यर्थः। व्यापकनिवृत्तौ व्याप्यनिवृत्तेराव
श्यकत्वादिति भावः। मतं दूषयति अस्त्वेतदिति। अन्ये त्विति मतोक्तमप्रामाण्याभावरूपप्रामाण्यसाधनं यद्युक्तमात्मामि
त्यर्थः। उक्तेर्वृगतिरिति। द्वितीयानुव्यवसायेन तद्ग्रहस्तदनन्तरं क्वचिदनुमानेन तद्ग्रहस्तदेवरूपेत्यर्थः। नन्वेवमप्येतन्म
तं निर्दुष्टमिति वाच्यं। अयं भावः। तद्वति तत्प्रकारकत्वरूपस्यैव स्वतस्त्वोपयोगिप्रामाण्यस्य परैः स्वतस्त्वानभ्युपगमात् नैव

परतस्त्वव्यवस्थापनेऽप्युक्तं। न तदप्रामाण्याभावरूपप्रामाण्ये। तदभावादिघटिते तच्चैव परैः स्वतस्त्वानभ्युपगमात्। अन्यथा परमतेऽप्रा
माण्यस्यापि स्वतस्त्वापत्तेः। तदभावादिघटितत्वाविशेषात्॥ ननु परस्येष्टापत्तिः। अप्रामाण्यस्य केनापि स्वतस्त्वानभ्युपगमेना
प्रसिद्धान्तात्॥ कुतो नाभ्युपगम्यते इति चेत् अप्रामाण्यघटकतदभाववत्त्वादेरनुपस्थितेः। तस्मादयं रजतत्वेनानुभवः रजतत्वाभाववद्
ति रजतत्वप्रकारकः विसंवादिप्रवृत्तिजनकज्ञानत्वादित्याद्यनुमानेनाप्रामाण्यं गृह्यत इति तस्य परतस्त्वमेवेति। नन्वेतद्व्यतिरेकि
णाऽप्रामाण्याभावरूपप्रामाण्यसिद्धिर्जायमाना पक्षधर्मताबलान्न तद्वति तत्प्रकारकत्वमादायैव पर्यवस्यति तथा च प्रागुक्तदोषद्
त्यस्वरसादाह किं चेति न। अनुव्यवसायं कुतस्त्विति। प्रागुक्तव्यतिरेक्यनुमानात्तु न कुतस्त्वित्यर्थः। अपन्यायनये प्रामाण्ये किं तत्परत
मिति चेत् ज्ञानसामान्यग्राहकातिरिक्तग्राह्यमेव तत्॥ ज्ञानसामान्यग्राह्यकातिरिक्तं द्वितीयानुव्यवसायप्रागुक्तानुमानं च तद्ग्राह्यत
स्य प्रामाण्यमात्रेसत्त्वादितिरिक्तम्॥ तद्वति तत्प्रकारकज्ञानं प्रमेति लक्षणे यो दोषस्तेनान्यथाख्यातिवत्स्त्रापिमतं प्रथमं प्राभाकरमतं
सदपहस्तेनोपन्यस्यति अन्ये त्विति॥ यद्यन्यथाख्यातिर्न स्यात्तदा लक्षणे तद्वतीति विशेषणं व्यर्थमेव स्यात्। व्यावर्त्याभावात्।
अन्यथाख्यातौ सिद्धौ च तद्विशेषणसार्थक्ये तादृशप्रमालक्षणसिद्ध्याभवत्यपोद्धातदिति भावः॥ ज्ञानद्वयमेवेत्येवकारेण तद्व
तीति विशेषणव्यवच्छेदः। प्रामाण्ये। प्रमालक्षणे। तदसिद्धेरिति। रजतत्वप्रकारकज्ञानस्य शुक्तिविशेष्यकत्वासिद्धेरित्यर्थः। तेनन
सिद्धसिद्धिभ्यां व्याघातः। नन्वेवं शुक्ताविदं रजतमिति ज्ञानस्य का गतिः। तस्य ग्रहणस्मरणात्मकज्ञानद्वयत्वात्। भ्रमव्यवहार
विषयापि अग्रहीतासंसर्गकत्वात् ज्ञानद्वयमेवेति न काप्यनुपपत्तिरिति भावः। तादृशज्ञानासिद्धिमेव विवृणोति न हीति
न चैतावन्तं कालमिमं शुक्तिखण्डं रजतत्वेनाज्ञासिषमिति प्रत्यक्षमेव तत्र मानमिति वाच्यं। तस्येदं रजतमिति ज्ञानद्वयविषयक
त्वेनैवोपपत्तिरित्युक्तप्रायत्वादिति। शंकते कथं तर्हीति। यदि शुक्तिविशेष्यकरजतत्वप्रकारकज्ञानासिद्धिस्तर्हि इदं रजतमि
त्याकारको भिन्नाभिलापात्मकव्यवहारः शुक्तौ कथं जायत इत्यर्थः। तत्र शुक्तौ। इदं चासंसर्गाग्रहादिति। सेनेत्यन्वयि। तथा च व्यव

न्या॰ सं॰ हृत्त्यरजतत्वस्य शुक्त्यादावसंसर्गग्रहो नेदं रजतमित्याकारकोऽरजतव्यवहारे प्रतिबंधकस्तदभावस्तत्र कारणमित्यर्थः। ननु शुक्ति
विशेष्यकरजतत्वप्रकारकभ्रमस्यान्यथानुपपत्त्या शुक्तिविशेष्यकरजतत्वप्रकारकज्ञानमेवकल्प्यतामुपेयमतस्त्वाह रजतत्वप्रकारक
ति। इष्टभेदाग्रहस्य प्रवर्त्तकत्वे इष्टस्य रजतादेरननुगततया इष्टतावच्छेदकरजतत्वादिना नुगमो वाच्यः तथा च लाघवादिष्टता गु३
१०० वच्छेदकरजतत्वासंसर्गाग्रह एव प्रवृत्तिहेतुरित्याशयेनाह इष्टतावच्छेदकेति। तथा चेष्टतावच्छेदकरजतत्वसंसर्गाग्रहो नेदं
रजतमित्याकारकोऽरजतत्वप्रकारकः प्रवृत्तौ प्रतिबंधकस्तदभावस्तत्र कारणमिति न तादृशाग्रहस्यान्यथानुपपत्तिरिति भावः।
तथा च। रजतत्वप्रकारकभ्रमे चेरजतत्वप्रकारकज्ञानं कारणं तथा सति तेन च। तेन विना। रजतत्वप्रकारकज्ञानेन विना।
तत्रापीति। रजतत्वप्रकारकभ्रमारूढायां प्रवृत्तावपि रजतत्वासंसर्गाग्रहरूपप्रतिबंधकाभावस्यैव हेतुत्वादित्यर्थः। इष्टताव
च्छेदकरजतत्वासंसर्गाग्रहस्य प्रवृत्तिसामान्यहेतुतायां बाधकमाशंकते। ग्येति॥ तद्वतीति। रजतत्ववति रजतत्वासंसर्गाग्र
हस्य संवादिन्यां रजतत्वाभाववति रजतत्वासंसर्गाग्रहस्य विसंवादिन्यां कारणत्वात् प्रवृत्तिविशेषोपपत्तिरिति भावः। भासाक
रेणादूषितामन्यथाख्यातिं साधयितुं नैयायिकः सिद्धांतयति अत्रोच्यत इति॥ लाघवादिति। कारणतावच्छेदकलाघवादित्यर्थः
रजतत्वेति रजतत्वप्रकारकज्ञानमित्यर्थः। गौरवादिति रजतत्वासंसर्गाग्रहस्याभावद्वयगर्भत्वेन कारणतावच्छेदकगौरवा २००
दित्यर्थः। इदमुपलक्षणं। इष्टतावच्छेदकरजतत्वासंसर्गाग्रहस्य प्रवर्त्तकत्वे इष्टतावच्छेदकशुक्तित्वासंसर्गाग्रहस्य
निवर्त्तकत्वमपि वाच्यं। तथा च शुक्ताविदं रजतमिति ग्रहद्वयात् युगपत्प्रवृत्तिनिवृत्त्यापत्तिः। प्रवृत्तिहेतोरजतत्वासंसर्गा
ग्रहस्य निवृत्तिहेतोः शुक्तित्वासंसर्गाग्रहस्यापि तत्र सत्त्वात्॥ मुक्तौ शुक्तित्वासंसर्गाग्रहस्वीकारे चान्यथाख्यात्यापत्तेरि
ति। ननु शुक्तौ रजतत्वस्यासत्त्वात् रजतत्वप्रकारकज्ञानं न संभवतीत्याशंकां निषेधति नचेति॥ तदसंभवः। रजतत्वप्रकारकज्ञा

नासंभवः। विशेषणज्ञानमित्यादि विशेषणं ज्ञानं विशेष्येंद्रियसन्निकर्षो विशेषणविशेष्ययोरसंसर्गाग्रहश्चेति त्रितयं यत्रास्ति त
त्र तद्विशेषणप्रकारकं ज्ञानं संभवत्येव तथा च शुक्तावप्येतत्त्रितयसत्त्वात् रजतत्वप्रकारकज्ञानानुपपत्तिरिति भावः। न चैतत्त्रितयस्याविशि
ष्टत्वाद्रजतत्वप्रकारकज्ञानेऽपि किंचित्प्रमारूपं किंचिद्भ्रमारूपमिति न नियामकमस्तीति वाच्यं। यत्र त्वेतत्त्रितयं दोषानुभवे तत्र भ्रमा: का३
यत्र च गुणानुभवे तत्र प्रमा याथार्थ्यात्॥ अत एव प्रमां प्रति दोषः प्रमां प्रति च गुणः कारणमिति सिद्धांतः। स च दोषः पित्तदूरत्वादि
दोषदर्शनादिरूपो। ननु गुणोऽप्यन्वयव्यतिरेकाभ्यां तु स्वरूपेण प्रमायां कारणं हेतुः। एवं च गुणोऽप्यनुगत एव परं त्वन्वयव्यतिरेकाभ्यां वं५०
हेतुः। तथाहि। प्रत्यक्षप्रमायां भूयोवयवावच्छेदेनेंद्रियसन्निकर्षो विशेषणताविशेष्येंद्रियसन्निकर्षो वा गुणः। अनुमितिप्रमा
यां सल्लिंगपरामर्शः। साध्यवति लिंगपरामर्शो वा गुणः। उपमितिप्रमायां यथार्थातिदेशवाक्यार्थज्ञानं सादृश्यप्रमैव वा गुणः। एवं
शाब्दप्रमायां यथार्थवक्तृवाक्यार्थज्ञानं योग्यताप्रमैव वा गुण इति॥ प्रमायामसाधारणकारणं गुणः। एवं भ्रमायामसाधारणका
रणं दोष इति॥ यत्तु कश्चिदाह रजतत्वविशिष्टशुक्तावि इदं रजतमित्याकारान्यथाख्यातिस्वीकारे ज्ञानस्य साकारवादापत्तिरसत्ख्या (लेख्य)
तिवादापत्तिश्चेति। तन्न॥ ज्ञानसाकारतावादी ज्ञानमेव रजतमित्याह॥ तन्मते ज्ञानातिरिक्तपदार्थाभावात्॥ असत्ख्यातिस्तु वि
द्यमानमेव रजतमन्यथाख्यातौ विषयस्तु च्यते॥ ननु ज्ञानरजतयोरभेद इति न साकारवादापत्तिः। एवमसत्ख्यातिवादापत्ति)
नह्यन्यथाख्यातावसत्किंचिद्भासते। शुक्तौ रजतत्वस्य विशिष्टज्ञानोत्तरत्र सत्त्वात्। नन्वेवमस्याः सद्विषयकत्वे प्रमात्वं स्यादिति
वाच्यं। न ह्यसद्विषयकत्वं प्रमात्वं किंतु व्यधिकरणप्रकारकज्ञानत्वमिति सिद्धांतात्॥ न चास्य सद्विषयकत्वे को दोष इति वाच्यं॥ अस
तः प्रतीत्यनुपपत्तेः। अन्यथा शशविषाणादेरपि प्रतीत्यापत्तेः तस्मादन्यत्र सदेव रजतं विशेषदर्शनादिवशात् स्फुरति भा
सत इति॥ नानुपपत्तिलेशोऽपीति दिक्॥ टीकायां तत्र अत्र सदेव वैशिष्ट्यं सतो रजतादेरूपरागतया स्फुरति भासते। न चासत्वा

स्याद्वेन्निः॥ असत्ख्यातिवादे हि असत एव रजतादेरूपरागतया॥ स्वं हि शिष्यस्य स्वकोमानास्युपगमात्॥ नन्वेदमस्मन्मतद्
स्यादूः॥ वेदांतिनस्तु सदसद्व्यामनिर्वचनीयमेव रजतमुक्ता दोषाभावेनतु व्यावहारिकं॥ तस्य व्यवहारार्थं सामग्र्यादि
स्यादूः॥ अयं रजतमिति॥ विशेषविशेष्योभयसन्निकर्षस्य विशिष्टप्रत्यक्षहेतुत्वात्॥ तत्र सन्निकर्षाभावान्न कथं रजतबु
ध्यकारकमप्यक्षं रूपमित्यर्थः॥ सन्निहितमिति। इंद्रियलौकिकसंबंधविशिष्टमित्यर्थः॥ अन्यत्रास्वत्र्यादौ। ज्ञानस्यारजतबु
द्धीनस्य॥ ननु ज्ञानस्य सन्निकर्षत्वे व्याप्तिज्ञानानन्तरं पर्वते वन्हिप्रत्यक्षमेव स्यान्नत्वनुमितिः॥ तत्र वन्हिप्रसिद्धेः सत्वात्॥ नन्वे
वमनुमानवैयर्थ्यं। एवं तावन्हिमान्नित्युद्देश्यप्रतीत्यसत्त्वेनानुमानसार्थक्यादिति चेन्न॥ अलौकिकरूपत्वस्य सामग्र्याः॥ सवा
पेक्षया बलवत्त्वेन तत्रानुमितिसामग्र्यामनुमितेरेवोत्पादात्॥ अन्यथा ह्यन्यापि परजन्यपदार्थापत्तेः॥ सवात्म्यत्वात् समा
तत्र स्वदार्थसंसर्गप्रत्यक्षसंभवेन प्रत्यक्षमात्रपरिशेषापत्तेः॥ नन्वेच्छाघटितसामग्र्याबलवत्त्वात्॥ सिषाधयिषयानुमा
नादिसंभवान्नतत्परिशेषापत्तिरिति वाच्यं॥ तथापि सिषाधयिषाया मत्त्वे पर्वते वन्हिनिश्चयानन्तरं वन्हिमानिति १००
तो मित्यनुमत्यापत्तेरिति दिक्॥ ॥१॥ इति श्रीमन्महामहोपाध्यायकौ॥ स्तिगोत्रमनुर्जवृद्धनु ... शर्म्मणः
त्तनुनामास्करेणाविरचितोन्यायसिद्धांतमंजरीप्रकाशः॥ संपूर्णं॥ ॥संवत १८२२ शाके १६८७ प्रवर्त्तमाने मासोत्तमे मा
से॥ अश्विनमासे धवलपक्षे नवम्यां गुरुवासरे॥ वृद्धपत्रमध्ये ... लिपिं ... लिखीतं॥ इदं पुस्तकं॥

जडियोपाधिरघुनश्यामस्यपुस्तकं